लग्नाऽभून्मुरशत्रौ कस्तूरीरसचर्चा ॥

अथाऽनुष्टुबादौ श्लोकमाह

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ॥
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥१०॥

श्रुतिः— श्लोक इति श्लोकच्छन्दो लक्ष्यते। श्लोकेऽनुष्टुभि सर्वत्र चतुर्षु चरणेषु पञ्चमं पञ्चमाक्षरं लघु षष्ठं षष्ठाक्षरञ्च गुरु स्यात्। द्विचतुष्पादयोर्द्वितीयचतुर्थचरणयोः सप्तमं सप्तमाक्षरं लघु भवेदन्ययोः प्रथमतृतीयपादयोः सप्तममक्षरं दीर्घत्वं भजते चेत्तद् वृत्तं श्लोक इति ज्ञेयं ज्ञातव्यम्। वाल्मीकिमुनेः क्रौञ्चप्रसङ्गे "मा निषाद! प्रतिष्ठा" मिति वृत्तेनाऽनुष्टुभा प्रवर्तमाना वाणी शोकत्वाच्छलोकत्वेन परिणता यथोक्तं ध्वन्यालोके- **"क्रौञ्च द्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः।"** (ध्वन्या० १/५) अष्टाक्षरपदात्मकेऽनुष्टुभि छन्दसि श्लोको नाम वृत्तं वैदिकानुष्टुप्छन्दसो भिन्नत्वं विभर्त्ति ।।१०।।

अन्वय— श्लोके सर्वत्र षष्ठं गुरु पञ्चमं च लघु द्विचतुष्पादयोः सप्तमं ह्रस्वमन्ययोः (सप्तमं) दीर्घं ज्ञेयम् ।

स्मृतिव्याख्या— श्लोक छन्द में प्रत्येक चरण आठ अक्षरों वाला होता है। इसके चारों चरणों में पञ्चम अक्षर लघु तथा षष्ठ वर्ण गुरु होता है। दूसरे तथा चौथे चरण में सप्तम वर्ण लघु और प्रथम तथा तृतीय चरण में सप्तम अक्षर गुरु रखा जाता है। इस छन्द का अपर नाम अनुष्टुप् भी है।

वेदों में भी अनुष्टुप् छन्द का प्रयोग हुआ है, किन्तु लौकिक अनुष्टुप् छन्द से वैदिक अनुष्टुप् छन्द की भिन्नता देखी जाती है। प्रत्येक पाद में आठ-आठ अक्षर होने से ही वैदिक अनुष्टुप् हो जाता है जब कि लौकिक अनुष्टुप् में उपर्युक्त श्लोक छन्द जैसी स्थिति रहती है। क्रौञ्चपक्षी के दुःख को देखकर वाल्मीकि मुनि के अन्तर्गत शोक उत्पन्न हुआ और वह शोकाकुल होकर 'मा निषाद०।' इत्यादि अनुष्टुभ् छन्द की वाणी से व्याध के प्रति जो शाप दिया, वही वाणी शोक से श्लोक के रूप में परिणत हो गयी और लोक में नवीन अनुष्टुप् छन्द श्लोक का अवतार हुआ। इस तथ्य को आनन्दवर्द्धन ने स्पष्ट भी किया है— **"क्रौञ्चद्वन्द्व वियोगोत्थः शोकः श्लोकत्वमागतः।"** (ध्वन्यालोक १/५)

उदाहरण[१]— श्लोके षष्ठं गुरुं ज्ञेयं —— प्रथम पाद
५६ ७

---

१. द्वितीयोदाहरण— वागर्थाविव सम्पृक्तौ वागर्थप्रतिपत्तये ।
जगतः पितरौ वन्दे पार्वतीपरमेश्वरौ ।।

सर्वत्र लघुं पॅञ्चंमम् । —— द्वितीय पाद
५ ६ ७

द्विचतुष्पादंयोर्ह्रस्वं —— तृतीय पाद
५६७

सप्तमं दीर्घमंन्यंयोः । —— चतुर्थपाद।
५ ६ ७

यहाँ उपर्युक्त लक्षणानुसार प्रत्येक चरण गत लघु गुरु की व्यवस्था होने से श्लोक (अनुष्टुप्) छन्द है।

अथ पद्यमाह

पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयादेतत् पद्यस्य लक्षणम् ॥११॥

श्रुतिः– पञ्चममिति पद्यं लक्ष्यते। यस्मिन् वृत्ते सर्वंत्र चतुर्षु पादेषु पञ्चमं पञ्चमाक्षरं लघु ह्रस्वं द्विचतुर्थयोर्द्वितीयचतुर्थयोश्चरणयोः सप्तमं सप्तमसङ्ख्याकमक्षरं लघु स्यात् तथा च सर्वपादेषु षष्ठं षष्ठाक्षरं गुरु भवेत् तर्हि पद्यस्येतल्लक्षणं विजानीयात् बुध्येत। अस्मिन् वृत्तेऽपि प्रतिचरणमष्टाक्षरात्मकं भवति तस्मादिदमनुष्टुभो भेदत्वमेव सङ्गच्छते ॥११॥

अन्वय– सर्वत्र पञ्चमं लघु द्विचतुर्थयोः सप्तमं (लघु) षष्ठं (च सर्वत्र) गुरु (स्यात्) एतत्पद्यस्य लक्षणं विजानीयात्॥

स्मृतिव्याख्या– जिस छन्द में चारों चरण आठ-आठ अक्षरों के हों तथा सभी चरणों में पञ्चम वर्ण लघु हो और षष्ठ अक्षर गुरु हो। इसके अतिरिक्त द्वितीय और चतुर्थ चरण में सप्तमवर्ण लघु हो तो वहाँ पद्य छन्द होता है। इसे पूर्वोक्त श्लोक भी कहते हैं। यह भी अनुष्टुप् छन्द ही है ॥११॥

उदाहरण[१]– पञ्चमं लघुं संर्वत्र —— प्रथम पाद
५ ६ ७

सप्तमं द्विचंतुंर्थयोः । —— द्वितीय पाद
५६७

---

१. द्वितीयोदाहरण– अमुना यमुनाकूलवटमूलविहारिणा ।
हारिणा हरिणा हन्त ! हेलितं हृदयं मम॥

षष्ठं गुरु विजानीया —— तृतीय पाद
५ ६ ७
देतत्पद्यस्यलक्षणम् । —— चतुर्थ पाद
५६७

यहाँ प्रत्येक पाद में लक्षणोक्त लघु गुरु की व्यवस्था होने से पद्य (अनुष्टुप्) छन्द है।

अथ माणवकाक्रीडमाह

आदिगतं तुर्यगतं पञ्चमकं चान्त्यगतम् ॥
स्याद् गुरु चेत्तत्कथितं माणवकाक्रीडमिदम् ॥१२॥

श्रुतिः– 'आदिगतमित्यादिना माणवकाक्रीडं लक्षयति ॥ अस्मिञ्छन्दसि वर्णाः स्युरष्टौ चतुर्षु पादेषु। यत्रादिगतं प्रथमाक्षरं तुर्यगतं चतुर्थाक्षरं पञ्चमं पञ्चममक्षरमन्त्यगतं चरणान्तवर्ति तच्चाष्टममक्षरं चेद् गुरु स्यात् द्विमात्रिकं भवेत्तच्छन्दो माणवकाक्रीडमित्यभिधीयते। वृत्तरत्नाकरे वृत्तमेतन्माणवकमिति नाम्नाऽभिहितम्–**"माणवकं भात्तलगाः।" (वृत्तरत्नाकरे ३/१४)**। पिङ्गलसूत्रेऽस्य सञ्ज्ञा **'माणवकाक्रीडिकम्'** इत्यस्ति। **'माणवकक्रीड'** मिति वृत्तमुक्तावल्यामुक्तं यथा– **"भं गपरं द्विः प्रणयेदित्युदितं यस्य पदम्। माणवकक्रीडमितिज्ञेयमहो वृत्तमदः॥"** (वृत्तमुक्तावल्याम् ३/८०)

अन्वय– आदिगतं तुर्यगतं पञ्चमकम् अन्त्यगतं च गुरु चेत् स्यात्तत् माणवकाक्रीडम् इदं कथितम् ।

स्मृतिव्याख्या– प्रत्येक पाद में आठ-आठ अक्षर हों तथा चारों पादों में प्रथम, चतुर्थ, पञ्चम और अष्टम वर्ण गुरु हो तो उसे माणवकाक्रीड वृत्त कहा जाता है। आचार्य पिङ्गल ने इस छन्द को 'माणवकाक्रीडितकम्' कहा है। वृत्तरत्नाकर में इसे **'माणवक'** छन्द कह कर पुकारा गया है– **"माणवकं भात्तलगाः"** (वृत्तरत्नाकर ३/१४) अर्थात् जिसमें भगण, तगण, लघु तथा गुरु प्रत्येक पाद में क्रमशः हो उसे माणवक छन्द कहते हैं। 'वृत्तमुक्तावली' में भी यही लक्षण दिया गया है, परन्तु छन्द का नाम **'माणवकक्रीड'** है। यह वर्णिक छन्द है। **'छन्दोमञ्जरी' (२/१७)** में भी यही लक्षण दिया गया है।

उदाहरण[1]– भ० त० ल०गु०
आदिगतं तुर्यगतं —— प्रथम पाद
१ २३४ ५६७८

---

१. **द्वितीयोदाहरण–** माणवकाक्रीडितकं यः कुरुते वृद्धवयाः ।
हास्यमसौ याति जने भिक्षुरिव स्त्रीचपलः ॥

भ० त० ल०गु०
पञ्चमंकं चान्त्यंगंतम् । —— द्वितीय पाद
१ २३४ ५ ६७८

इसीप्रकार अन्य चरणो में भी उपर्युक्त लघु गुरु का ज्ञान करना चाहिए। तृतीय और चतुर्थ पाद भी प्रथमपादवत् होंगे।

अथ नगस्वरूपिणीमाह

द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा ॥
तदा निवेदयन्ति तां बुधा नगस्वरूपिणीम् ॥१३॥

श्रुतिः–द्वितुर्येत्यादिना नगस्वरूपिणी लक्ष्यते। यदा यत्र छन्दसि द्वितुर्यषष्ठं द्वितीयं चतुर्थं षष्ठं तथाष्टमं चाऽक्षरं गुरु दीर्घं प्रयोजितं प्रयुक्तं स्यात् तदा तर्हि बुधाः कोविदास्तां नगस्वरूपिणीं निवेदयन्ति, वृत्तमेतन्नाम वदन्ति। कैश्चिच्छन्दोविद्भिर्वृत्तमिदं प्रमाणिकेति नाम्नाऽभिहितम्। यथोक्तं वृत्तरत्नाकरे– **"प्रमाणिका जरौ लगौ।"** वृत्तरत्नाकर ३/१७) तथोक्तं च वृत्तरत्नावल्याम्– **"लघुर्गुरुनिरन्तरं यथाक्रमं निधीयताम्। तदा प्रमाणिकाभिधं सुवृत्तमष्टवर्णकम् ॥"** (वृत्तमुक्तावल्यां ३/७८) सुवृत्ततिलके (१/१३) वृत्तमिदं 'प्रमाणी' ति कथ्यते ॥

अन्वय– यदा द्वितुर्यषष्ठम् अष्टमं च गुरु प्रयोजितं तदा बुधाः तां नगस्वरूपिणीं निवेदयन्ति।

स्मृतिव्याख्या– प्रत्येक पाद में आठ-आठ अक्षर हों तथा द्वितीय चतुर्थ, षष्ठ और अष्टम अक्षर गुरु हों, तो पण्डितगण उसे नगस्वरूपिणी छन्द कहते हैं। नगस्वरूपिणी छन्द का दूसरा नाम प्रमाणिका है। वृत्तरत्नाकर (३/१७) तथा छन्दोमञ्जरी (२/२०) में इस छन्द का लक्षण इस प्रकार दिया गया है– "प्रमाणिका जरौ लगौ।"

अर्थात् यदि जगण, रगण, लघु तथा गुरु क्रमशः आये तो प्रमाणिका छन्द बनता है। वृत्तमुक्तावलीकार ने भी यही कहा है कि यदि प्रत्येक पाद में आठ अक्षर हो और उन आठों वर्णों में लघु-गुरु यह क्रम निरन्तर रहे तो वह प्रमाणिका नामक वृत्त कहा जाता है–

"लघुर्गुरुर्निरन्तरं यथाक्रमं निधीयताम् ।
तदा प्रमाणिकाभिधं सुवृत्तमष्टवर्णकम् ॥

(वृत्तमुक्तावली ३/७८)

उदाहरण[1]—
जo रo लoगुo
द्विंतुर्यंषष्ठंमष्टमं —— प्रथम पाद
१ २३४ ५६ ७८
जo रo लoगुo
गुरुं प्रयोजितं यदा —— द्वितीय पाद
१२ ३ ४ ५६ ७८

उपर्युक्त छन्द में अन्य पाद भी प्रथम पाद के अनुसार ही होते हैं, वहाँ भी गण तथा लघु, गुरु की व्यवस्था पूर्ववत् होगी ।

अथ विद्युन्मालामाह

सर्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः ॥
विद्वद्वृन्दैर्[2]वीणावाणि व्याख्याता सा विद्युन्माला ॥१४॥

श्रुतिः— 'सर्व' इति विद्युन्माला लक्षयति। हे वीणावाणि ! वीणावाणीव वाणी यस्याः सा वीणावाणी तस्याः सम्बुद्धौ। हे विपञ्ची-स्वरे बाले ! अष्टाक्षरात्मके यस्मिन् वृत्ते सर्वे वर्णा दीर्घा सर्वाण्यक्षराणि गुरूणि स्युर्विश्रामो यतिश्च वेदैर्वेदैर्चतुभिश्चतुभिर्वर्णैः स्याच्चेत्सा विद्युन्माला एतन्नामधेयं छन्दो विद्वद्वृन्दैः कोविदगणैर्व्याख्याता व्याख्यायि। एतल्लक्षणं वृत्तरत्नाकरे (३.१३) भाणितं यथा– **"मो मो गो गो विद्युन्माला।"** अत्र क्वचित् **"मो मो गो गो विद्युल्लेखा"** इति तत्र पाठान्तरमपि प्राप्यते। सुवृत्ततिलकेऽप्युक्त क्षेमेन्द्रेण– **"मकारयुगपर्यन्ते यत्संयुक्तगुरुद्वयम् ॥ विद्युन्मालाभिधं तदिह वृत्तमष्टाक्षरं विदुः॥** (सुवृत्ततिलके १/१२) वृत्तरत्नावल्यामप्युक्तं तथा–**"यस्यामष्टौ वक्रा युक्ताः पादे स्युः सुप्रज्ञैरुक्ताः। सा विज्ञेया विद्युन्माला चेतोहर्त्री यद्वद्बाला॥"** (वृत्तामुक्तावल्याम् ३/७६) वृत्तरत्नाकरानुसारिलक्षणमस्य छन्दोमञ्जर्या (२/१८) मपि प्राप्यते ॥१४॥

अन्वय— (हे) वीणावाणि ! यस्यां सर्वे वर्णा दीर्घा (स्युः) वेदैर्वेदैर्विश्रामः स्यात्सा विद्वद्वृन्दैर्विद्युन्माला व्याख्याता ।

---

१. द्वितीयोदाहरण— विलासिनीविलासिनं तडिद्दुकूलभासिनम् ।
समोदरासलासिनं भजे निकुञ्जवासिनम् ॥

२. छन्दोऽध्येतर्विद्वद्वृन्दैर्"- इति पाठान्तरम् ।

स्मृतिव्याख्या– जिस छन्द के प्रत्येक चरण में आठ वर्ण होते हैं, चार चार वर्णों पर विराम होता है तथा सभी वर्ण दीर्घ होते हैं तो विद्वद्वृन्द उस छन्द को विद्युन्माला कहते हैं।

विद्युन्माला छन्द का लक्षण केदारभट्ट ने भी लिखा है– **"मो मो गो गो विद्युन्माला।"** **(वृत्तरत्नाकर ३/१३)** अर्थात् यदि दो मगण तथा दो गुरु क्रमश हों तो उसे विद्युन्माला छन्द कहा जाता है। यही छन्दोमञ्जरीकार ने भी लिखा है। (द्रष्टव्य छन्दोमञ्जरी २/१८) वृत्तरत्नाकर की कुछ प्राचीन पाण्डुलिपियों में इसे विद्युल्लेखा' छन्द के नाम से अभिहित किया गया है। वृत्तमुक्तावलीकार ने भी विद्युन्माला छन्द का लक्षण उक्त प्रकार से दिया है। आचार्य क्षेमेन्द्र ने भी इस छन्द का लक्षण अधोलिखित प्रकारेण दिया है–

मकारयुगपर्यन्ते यत्संयुक्तगुरुद्वयम् ।
विद्युन्मालाऽभिधं तद्धि वृत्तमष्टाक्षरं विदुः ॥

(सुवृत्ततिलक १/१२)

तथा 'विद्युन्माला मौ गौ यह लक्षण पिङ्गल सूत्र (६/११) में भी लिखा है।

उदाहरण[१]–

म० म० गु०गु०
सर्वे वर्णा दीर्घा यस्याम् —— प्रथम पाद
१२ ३४ ५६ ७८

म० म० गु०गु०
विश्रामः स्याद् वेदैर्वेदैः । —— द्वितीय पाद
१२३ ४ ५६७८

शेष पादों में भी उपर्युक्त व्यवस्थानुसार गण अथवा गुरु वर्णों का विन्यास होगा ।

अथ चम्पकमालामाह

तन्वि[२] ! गुरु स्यादाद्यचतुर्थं पञ्चमषष्ठं चान्त्यमुपान्त्यम् ॥
इन्द्रियबाणैर्यत्र विरामः सा कथनीया चम्पकमाला ॥१५॥

श्रुतिः– 'तन्वी' ति चम्पकमालां लक्षयति। हे तन्वि ! तन्वङ्गिबाले ! यत्र यस्मिन् वृत्ते आद्यचतुर्थं प्रथमं चतुर्थञ्च पञ्चमषष्ठं पञ्चमाक्षरं षष्ठाक्षरं चाऽन्त्यं पादान्त्यं दशममुपान्त्यं

---

१. मौनं ध्यानं भूमौ शय्या गुर्वी तस्याः कामावस्था। मेघोत्सङ्गे नृत्तासक्ता यस्मिन् काले विद्युन्माला ॥

२. "शिष्य"– इति पाठान्तरम् ।

नवमाक्षरं च गुरु स्याद् दीर्घं भवेत् । अत्रेन्द्रियबाणैरिन्द्रियाणि पञ्च बाणाः कामबाणाः पञ्च तैः पञ्चभिः पञ्चभिर्वर्णैः विश्रामो यतिः स्यात् सा चम्पकमाला कथनीया चम्पकमालाख्यवृत्तमभिधेयम् ।प्राचीनाचार्यैरेषा 'रुक्मवती' ति नाम्नाऽभिहिता- यथोक्तं पिङ्गलसूत्रे– "रुक्मवती भ्मौ स्गौ।" (पिङ्गलसूत्रे ६/१७)। तथा चोक्तं छन्दोमञ्जर्यां गङ्गादासेन– "रुक्मवती सा यत्र भमस्गाः।" (छन्दोमञ्जर्याम् २/३१) वृत्तरत्नाकरेऽस्यवृत्तस्य नाम चम्पकमालैव-"चम्पकमाला चेद्भमसाद्गः।" वृत्तरत्नाकरे (पृ० ३७) वृत्तरत्नाकरेऽपि 'चम्पकमाला' स्थाने 'रुक्मवती' ति पाठान्तरं क्वचित्प्राप्यते। वृत्तस्याऽस्य लक्षणमुक्तं सुवृत्ततिलकेऽपि– "संयुक्तं भमसैरन्ते गुरुणा च दशाक्षरम्।।वृत्तं रुक्मवती नाम कथितं वृत्तशालिभिः।।(सुवृत्त-तिलके १/१७) चम्पकमाला नाम्ना वृत्तमुक्तावल्यामेतद्वृत्तमुक्तम्- "स्याद्भगणान्ते यद् गुरुयुग्मं सन्तनुत द्विःसङ्गतमेवम् ।। चम्पकमाला नाम सुवृत्तं राजति भूयो मोहितचित्तम् ।।" (वृत्तमुक्तावल्याम् ३/१०७)।।

अन्वय– (हे) तन्वि! यत्र आद्य चतुर्थं पञ्चम षष्ठम् अन्त्यमुपान्त्यञ्च गुरु स्यात्, इन्द्रियबाणै -र्विरामः (भवेत्) सा चम्पकमाला कथनीया।

स्मृतिव्याख्या–जिस छन्द में प्रथम, चतुर्थ, पञ्चम, षष्ठ, नवम और दशम वर्ण गुरु हों तथा पाँच-पाँच अक्षरों पर यति हो तो उसे चम्पकमाला छन्द कहा जाता है। वृत्तरत्नाकर में इसे गणों के द्वारा इस प्रकार कहा गया है– "चम्पकमाला चेद् भमसाद् गः।" अर्थात् भगण, मगण, सगण तथा एक गुरु यदि क्रम से हों तो उसे चम्पकमाला छन्द कहा जाता है। पिङ्गलादि प्राचीन आचार्यों ने इस छन्द को 'रुक्मवती' कहा है। अन्य आचार्यों के लक्षण अधोलिखित हैं–

१. "रुक्मवती भ्मौ स्गौ"– (पिङ्गलसूत्र ६/१७)

२. संयुक्तं भमसैरन्ते गुरुणा च दशाक्षरम् ।
वृत्तं रुक्मवती नाम कथितं वृत्तशालिभिः।।" (सुवृत्ततिलक १/१७)

३. "रुक्मवती सा यत्र भमस्गाः।" (छन्दोमञ्जरी २/३१)
"स्याद् भगणान्ते यद् गुरुयुग्मं सन्तनुत द्विःसङ्गतमेवम्।
चम्पकमाला नाम सुवृत्तं राजति भूयो मोहितचित्तम् ।।"

(वृत्तमुक्तावली ३/१०७)

उदाहरण[१]– भ० म० स० गु०
तन्विं गुरुं स्यादाद्यचतुर्थं —— प्रथम पाद
१ २ ३ ४ ५ ६ ७ ८ ९ १०
भ० म० स० गु०
पञ्चमषष्ठं चान्त्यमुपान्त्यम् —— द्वितीय पाद।
१ २ ३ ४ ५ ६ ७ ८ ९ १०

इसी प्रकार अन्य चरणों को भी समझना चाहिए।

अथ मणिबन्धमाह

चम्कमाला यत्र भवेदन्त्यविहीना प्रेमनिधे[२] !
छन्दसि दक्षा ये कवयस्तन्मणिबन्धं ते ब्रुवते[३] ॥१६॥

श्रुतिः– 'चम्पकमाले' त्याह मणिबन्धच्छन्दः। हे प्रेमनिधे ! हे प्रेयसि ! यत्र यस्मिञ्छन्दसि चम्पकमालाच्छन्दोऽन्त्यविहीनाऽन्त्याक्षररहिता भवेत्स्यात् तर्हि छन्दसि दक्षा छन्दःशास्त्रे प्रवीणाः ये कवयः काव्यकाराः सन्ति ते तं वृत्तं मणिबन्धमेतन्नामकं छन्दो ब्रुवते कथयन्ति। नवाक्षरात्मकं वृत्तमिदम्। अत्र पञ्चभिश्चतुर्भिश्चाक्षरैर्यतिर्भवेत्। छन्दोमञ्जरीकारेणाऽस्य वृत्तस्य नाम 'मणिमध्यं' विहितं, यथोक्तं तेनैव-**"स्यान्मणि-मध्यं चेद् भमसाः।"** (छन्दोमञ्जर्याम् २/२५) तथा चोक्तं वृत्तमुक्तावल्याम्– **"चम्पकमाला निश्चरमा चेतसि धार्या सा परमा। स्यान्मणिबन्धं वृत्तमदः शंसत संसन्मध्यसदः॥"** (वृत्तमुक्तावल्याम् ३/१०९)॥

अन्वयः– (हे) प्रेमनिधे ! यत्र चम्पकमाला अन्त्यविहीना भवेद्। छन्दसि दक्षाः ये कवयः ते तं मणिबन्धं ब्रुवते॥

स्मृतिव्याख्या–यदि चम्पकमाला छन्द के पाद अन्तिम एक अक्षर से रहित हों तो छन्दःशास्त्र में प्रवीण कवि उसे मणिबन्ध छन्द कहते हैं। छन्दोमञ्जरीकार ने लिखा है कि यदि भगण, मगण तथा सगण क्रमशः प्रत्येक पाद में हो तो उसे 'मणिमध्य' छन्द कहा जाता है। उसे गङ्गादास ने 'मणिमध्य' नाम से अभिहित किया है– **"स्यान्मणिमध्यं चेद्**

---

१. द्वितीयोदाहरण– भग्नमसत्यैः कायसहस्रैर्मोहमयी गुर्वी भवमाया।
स्वप्नविलासा योगवियोगा रुक्मवती हा कस्य कृते श्रीः ॥

२. 'बुद्धिनिधे' इति पाठान्तरम्। 'लक्षणतः'– इति पाठान्तरञ्च ।

३. "इन्द्रियवेदैश्चेद् विरतिस्तन्मणिबन्धं सङ्कथितम्"– इति पाठान्तरमुत्तरार्द्धे।

भमसाः।" (छन्दोमञ्जरी २/२५) जब कि 'वृत्तमुक्तावली' में इसे 'मणिबन्ध' ही कहा गया है और इसका लक्षण श्रुतबोध के लक्षण के समान ही है। (द्रष्टव्य वृत्तमुक्तावली ३/१०९)।।

उदाहरण[१]— भ० म० स०
चम्पकमाला यत्र भवे — प्रथम पाद
१ २ ३ ४ ५ ६ ७ ८ ९
भ० म० स०
दन्त्यविहीना प्रेमनिधे — द्वितीय पाद।
१ २३ ४ ५ ६७८९

तृतीय तथा चतुर्थ चरणों में भी उपर्युक्त प्रकारेण गणादि की व्यवस्था होगी।

अथ शालिनीमाह

ह्रस्वो वर्णो जायते यत्र षष्ठः कम्बुग्रीवे[२] तद्वदेवाष्टमान्त्यः ।
विश्रामः स्यात्तन्वि[३]! वेदैस्तुरङ्गैस्तां भाषन्ते शालिनीं छान्दसीयाः ।।१७।।

श्रुतिः— 'ह्रस्व' इति शालिनी लक्ष्यते। हे तन्वि ! कम्बुग्रीवे ! शङ्ख-बन्धुरकन्धरे ! एकादशाक्षरात्मकेऽस्मिञ्छन्दसि चेत्षष्ठो वर्णो ह्रस्वो लघुत्वं जायते गच्छति तद्वदेवाऽष्टमान्त्यो नवमो वर्णः ह्रस्वः स्यात्तर्हि छान्दसीयाः छन्दः शास्त्रमर्मज्ञास्तां वृत्तिं शालिनीं भाषन्ते कथयन्ति। अत्र वेदैश्चतुर्भिस्तुरङ्गैः सप्तभिश्च यतिः कर्त्तव्या। वृत्तरत्नाकरे (३/३४) ऽप्युक्तमस्य लक्षणम्— "शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः।" (पिङ्गलसूत्रे ६/२५) लक्षणमस्य वृत्तस्य 'शालिनी म् तौ त् गौ ग्' समुद्र ऋषयः । तथोक्तं छन्दोमञ्जर्याम् (२/४५) मात्तौ गौ चेच्छालिनी वेदलोकैः। एवमेव भणितं क्षेमेन्द्रेण— "पूर्वाक्षरचतुष्कान्तविरतिर्मततान्विता। गुरुद्वितययुक्ता च शालिन्येकादशाक्षरा।।" (सुवृत्ततिलके १/२२) किञ्चोक्तं तथैव वृत्तमुक्तावल्याम् (३/१२५)— "यत्पादे स्युर्निर्मिता वेदवक्रा भूयो रम्यं रद्वयं चापि वक्रम् । इत्थं यत्या योजितेयं मनोज्ञा प्राज्ञैरुक्ता शालिनीशोभमाना।।"

---

१. द्वितीयोदाहरण— अम्बरविद्युद्द्योतधरं कुन्दवलाकाजातभरम् ।
मोदनलीलावारिझरं भावय कञ्चिन्मेघवरम् ।।

२. 'जिज्ञासो'— इति पाठान्तरम् ।

३. 'शिष्य'— इति पाठान्तरम् ।

अन्वय– (हे) तन्वि ! कम्बुग्रीवे ! यत्र षष्ठो वर्णो ह्रस्वो जायते तद्वदेवाऽष्टमान्त्यः (अपि ह्रस्वो भवेद्) वेदैस्तुरङ्गैः (च) विश्रामः स्यात्, छान्दसीयास्तां शालिनीं भाषन्ते ।

स्मृतिव्याख्या–प्रत्येकपाद में एकादशाक्षर हो तथा इनमें षष्ठ और नवम वर्ण ह्रस्व हों, चार-चार तथा सात-सात अक्षरों पर यति हो तो छन्दःशास्त्र के मर्मज्ञ इसे शालिनी छन्द कहते हैं। केदारभट्ट ने भी वृत्तरत्नाकर (३/३४) में शालिनी वृत्त का लक्षण दिया है– "शालिन्युक्ता म्तौ तगौ गोऽब्धिलोकैः।" अर्थात् यदि मगण, तगण, तगण तथा दो गुरु क्रम से हों तो उसे शालिनी छन्द कहते हैं जिसमें चार तथा सात वर्णों पर विराम भी होता है। आचार्य क्षेमेन्द्र तथा श्रीकृष्णभट्ट ने भी शालिनी छन्द के अधोलिखित लक्षण लिखे हैं–

१. पूर्वाक्षरचतुष्कान्तविरतिर्मततान्विता ।
गुरुद्वितययुक्ता च शालिन्येकादशाक्षरा ।। (सुवृत्ततिलक १/२२)

२. यत्पादे स्युर्निमिता वेदवक्रा भूयो रम्यं रद्वयं चापि वक्रम् ।।
इत्थं यत्या योजितेयं मनोज्ञा प्राज्ञैरुक्ता शालिनी शोभमाना ।।
(वृत्तमुक्तावली ३/१२५)

३. 'शालिनी म् तौ त् गौ ग् समुद्रऋषयः। (पि०सू० ६/२५)

४. मात्तौ गौ चेच्छालिनी वेदलोकैः (छन्दोमञ्जरी २/४५)

उदाहरण[1]–

म० | त० | त० | गु०गु०

ह्रस्वो वर्णो जायते यत्र षष्ठः — प्रथम पाद

६ ९

म० | त० | त० | गु० गु०

कम्बुग्रीवे तद्वदेवाऽष्टमान्त्यः — द्वितीय पाद।

६ ९

अन्य पादों को भी उपर्युक्त प्रकारेण समझना चाहिए।

अथ मन्दाक्रान्तामाह

चत्वारः प्राक् सुतनु[2] गुरवो द्वौ दशैकादशौ चे-

---

१. द्वितीयोदाहरण– मत्ता गोष्ठीगर्भमूढप्रलापा प्रौढागाढालिङ्गिता यौवनेन ।
मध्वाताम्रस्वेदमीलत्कपोला लोला लीलाशालिनी कस्य नेष्टा ।।

२. "यदि हि"– इतिपाठान्तरम्, "(प्राग) थ च"– इति पाठान्तरम् ।

न्मुग्धे[1] वर्णो तदनु कुमुदामोदिनि द्वादशान्त्यौ ।
तद्वच्चान्त्यौ युगरसहयैर्यत्र कान्ते[2] विरामो ।
मन्दाक्रान्तां प्रवरकवयस्तन्वि[3] तां सङ्गिरन्ते ।।१८।।

श्रुतिः– 'चत्वार' इति मन्दाक्रान्ता लक्ष्यते। हे सुतनु ! हे सुन्दरि ! यस्यां चत्वारो वर्णाः प्रागादौ गुरवो भवन्ति। हे मुग्धे ! ततो द्वौ दशैकादशौ वर्णौ गुरू स्याताम्। हे कुमुदामोदिनि! हे कुमुदपरिमले ! तदनु पुनर् द्वादशान्त्यौ त्रयोदशचतुर्दशौ वर्णौ गुरू दीर्घौ भवतः। तद्वत् तथैवाऽऽन्त्यौ षोडशसप्तदशौ च वर्णौ दीर्घौ भवेताम् । हे कान्ते ! हे प्रेयसि ! युगरसहयैश्चतुःषट्सप्तभिरक्षरैश्च विरामो यतिः स्यात्। हे तन्वि ! हे कृशाङ्गि ! तां वृत्तिं प्रवरकवयः श्रेष्ठकाव्यकर्त्तारो मन्दाक्रान्तां वृत्तजातिं सङ्गिरन्ते वदन्ति।। अस्मिन् वृत्ते सप्तदशाक्षराणि भवन्ति। पिङ्गलसूत्रेऽस्य लक्षणमुक्तम्– "मन्दाक्रान्ता म्भौ नतौ तगौ ग् समुद्रर्तुस्वराः ।" (पिङ्गलसूत्रे ७/१९) वृत्तरत्नाकरेऽप्युक्तम्– "मन्दाक्रान्ता जलधिषडगैर्म्भौ नतौ ताद् गुरू चेत् ।" (वृत्तरत्नाकरे ३/९७) तथा च छन्दोमञ्जर्यामपि (२/१६६)–"मन्दाक्रान्ताऽम्बुधिरसनगैर्मो भगो गो ययुग्मम् ।" एवमेवोक्तं सुवृत्ततिलके- चतुःषट्सप्तविरति वृत्तं सप्तदशाक्षरम्। मन्दाक्रान्ता मभनतैस्तगगैश्चाभिधीयते।। (सुवृत्ततिलके १/३५) श्रुतबोधानुसारमेवैतल्लक्षणमुक्तं वृत्तमुक्तावल्याम् ।।१८।।

अन्वय–(हे) सुतनु ! यत्र प्राक् चत्वारः गुरवः, दशैकादशौ च द्वादशान्त्यौ तद्वदेवाऽन्त्यौ अपि च द्वौ (गुरू स्याताम्) (हे) मुग्धे ! कुमुदामोदिनि ! कान्ते (हे) तन्वि ! युगरसहयैर्विरामश्च (स्यात्) प्रवरकवयः तां मन्दाक्रान्तां सङ्गिरन्ते ।

स्मृतिव्याख्या– प्रत्येक पाद में सत्रह अक्षर होते हैं तथा सभी चरणों में प्रथम से चार वर्ण, दशम, एकादश, त्रयोदश, चतुर्दश, षोडश तथा सप्तदश अक्षर गुरु हों। इसके अतिरिक्त चार, छः तथा सात वर्णों पर यति हो तो श्रेष्ठ कवि उसे मन्दाक्रान्ता छन्द कहते हैं। आचार्य पिङ्गल ने इसका लक्षण देते हुए कहा है कि जिस छन्द में मगण, भगण, नगण, तगण, तगण तथा दो गुरु हों और ४, ६, ७ अक्षरों पर विराम हो तो उसे मन्दाक्रान्ता वृत्त कहते हैं–

---

१. "छन्दोज्ञानप्रसितधिषणाऽनारतम्"– इति पाठान्तरम् ।
"तद्वद्वर्णौ तदनु गुरुताशालिनौ"–इति पाठान्तरम् ।
२. "वृत्ते"– इति पाठान्तरम्, "भूयाद्"– इति पाठान्तरम् ।
३. "साधु"– इति पाठान्तरम्, "तां मुदा,"– इति पाठान्तरम् ।

१. मन्दाक्रान्ता म्भौ न्तौ त्गौ ग् समुद्रर्तुस्वराः।'' (पिङ्गलसूत्र ७/१९)
वृत्तरत्नाकर आदि ग्रन्थों के लक्षण अधो लिखित हैं–

२. मन्दाक्रान्ता जलधिषडगैर्म्भौ म्भौ नतौ ताद् गुरू चेत् ।'' (वृत्तरत्नाकर ३/९७)

३. ''मन्दाक्रान्ताऽम्बुधिरसनगैर्मो भगौ गो ययुग्मम् ।'' (छन्दोमञ्जरी २/१६६)

४. चतुःषट्सप्तविरतिवृत्तं सप्तदशाक्षरम् ।
मन्दाक्रान्ता मभनतैस्तगगैश्चाभिधीयते ।। (सुवृत्ततिलक १/३५)

५. वेदा वक्रा नगणसगणौ रद्वयं चापि वक्रं
यस्यामेवं चरणनियमो भोगिराजेन गीतः ।
विश्रामः स्याद्युगरसहयैः सर्वदाऽऽनन्दहेतु-
र्मन्दाक्रान्ता परिलसति सा वृत्तशास्त्रे प्रसिद्धा ।। (वृत्तमुक्तावली ३/२३०)

उदाहरण[१]–

म० भ० न० त० त० गु० गु०
चत्वारः प्राक् सुतनु गुरवो द्वौ दशैकादशौ चे —— प्रथम पाद
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७

म० भ० न० त० त० गु० गु०
न्मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशान्त्यौ —— द्वितीय पाद
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७

ऐसी ही गुरु लघु की व्यवस्था अन्य चरणों में समझनी चाहिए।

अथहंसीच्छन्द आह

मन्दाक्रान्ताऽन्त्ययतिरहिता सालङ्कारे[२] भवति यदि सा ।
तद् विद्वद्[३]भिर्ध्रुवमभिहिता ज्ञेया हंसी कमलवदने[४] ।।१९।।

श्रुतिः– 'मन्दाक्रान्ते'ति हंसीं लक्षयति। हे अलङ्कारैराभूषणैः सहित ! साभूषणे ! कमलवदने! पद्मानने ! यदि मन्दाक्रान्ताऽन्त्ययति रहिता मन्दाक्रान्तावृत्तस्याऽन्तिमसप्त-

---

१. द्वितीययोदाहरण– मध्ये भङ्गी वलन विततापाङ्गसंसङ्गभाजः। स्मर्यन्ते ते यदि धृतिमुषः पक्ष्मलाक्षीकटाक्षाः। तत् किं मिथ्यानियमनिभृतैः कानने धीयते धीर्मन्दाक्रान्ता दशति निशिता पन्नगी पाणिसक्ता।।

२. 'सद्योग्राहाहिन्'– इति पाठान्तरम्। 'वर्णयुक्ता दशभिरिह सा'–इति पाठान्तरम्।

३. ''विद्वद्वृन्दै''– इति पाठान्तरम् ।

४. 'शुचितममते'– इति पाठान्तरम्। 'विदितविभवा'– इति पाठान्तरम् ।

क्षरविरामो यत्र स्यात्तर्हि विद्वद्भिः सुधीभिर्ध्रुवं निश्चयेनाऽभिहिता कथिता हंसी नाम वृत्ति-र्ज्ञेया ज्ञातव्या। दशाक्षरात्मकं वृत्तमिदम् । अस्य लक्षणमुक्तं वृत्तरत्नाकरपरिशिष्टे– "ज्ञेया हंसी मभनगयुता।" एवमेव छन्दो मञ्जर्यामपि।(२/४०) तथा चोक्तं वृत्तमुक्तावल्याम् (३/११६)– "मन्दाक्रान्ता कविविरहिता प्रान्ते सप्ताक्षरविरहिता। सा विज्ञेया विमलमतिभिर्नाम्ना हंसी विबुधततिभिः ।।"१९।।

अन्वय–(हे) सालङ्कारे ! कमलवदने ! यदि सा मन्दाक्रान्ताऽन्त्ययतिरहिता भवति। तद् विद्वद्भिः ध्रुवम् अभिहिता हंसी ज्ञेया ।

स्मृतिव्याख्या–मन्दाक्रान्ता छन्द यदि अन्त्य यति अर्थात् अन्तिम सात अक्षर से रहित हो तो विद्वज्जन उसे 'हंसी' कहते हैं। इसमें दश वर्ण होते हैं। 'हंसी' छन्द में चार तथा छः अक्षरों पर यति होती है। वृत्तरत्नाकर परिशिष्ट में गणानुसार हंसी छन्द का लक्षण दिया गया है– "ज्ञेया हंसी मभनगयुता।" यही लक्षण 'छन्दोमञ्जरी (२/४०) में भी प्राप्त होता है। अर्थात् मगण, भगण, नगण तथा एक गुरु हो तो उसे हंसी छन्द कहा जाता है श्रुतबोध के अनुसार ही 'वृत्तमुक्तावली' में हंसी छन्द का लक्षण निम्नलिखित है–

"मन्दाक्रान्ता कविवरहिता प्रान्ते सप्ताक्षरविरहिता ।
सा विज्ञेया विमलमतिभिर्नाम्ना हंसी विबुधततिभिः।।

(वृत्तरत्नावली ३/११६)

उदाहरण[1]–

म० भ० न० गु०	
मन्दाक्रान्ताऽन्त्ययतिरहिता	—— प्रथम पाद
१ २ ३ ४ ५ ६ ७ ८ ९ १०	
म० भ० न० गु०	
सालङ्कारे भवति यदि सा।	—— द्वितीय पाद
१ २ ३ ४ ५ ६ ७ ८ ९ १०	

उपर्युक्त उदाहरणानुसार अन्य चरणों का बोध करना चाहिए।

---

१. द्वितीयोदाहरण– कुञ्जे कुञ्जे कृतविलसनं विद्युन्मालाललितवसनम् ।।
चन्द्रज्योत्स्नाविशदहसनं वन्दे कृष्णं ब्रजनिवसनम् ।।

अथ दोधकवृत्तमाह

आद्यचतुर्थमहीननितम्बे[१] सप्तमकं दशमं च तथाऽन्त्यम् ।
यत्र[२] गुरु प्रकटस्मर[३]सारे तत्कथितं ननु दोधकवृत्तम् ॥२०॥

'आद्ये' ति दोधकं लक्षयति । हे अहीननितम्बे ! अहीनौ सुपुष्टौ नितम्बौ कटिपश्चाद्भागौ यस्याः सा तत्सम्बुद्धौ सुपुष्टश्रोणि ! यत्र यस्मिञ्छन्दसि आद्यचतुर्थं प्रथमं चतुर्थञ्च, सप्तमकं सप्तमं दशमं तथाऽन्यमेकादशमक्षरं गुरु दीर्घं भवेत् तर्हि हे प्रकटस्मरसारे प्रकटः स्मरसारः कामबलं नवयौवनं यस्याः सा तत्सम्बुद्धौ हे प्रस्फुटितनवयौवने। एतद्वृत्तं दोधकनाम्ना कथितम् । पिङ्गलाचार्योऽपि ब्रूते– "दोधकं भौ भ गौ ग्।" (पिङ्गलसूत्रे ६/२४) एतदेवोक्तं वृत्तरत्नाकरे (३/३३)– "दोधकवृत्तमिदं भभभाद्गौ।" छन्दोमञ्जर्या (२/५१)– मुक्तं लक्षणमेतत्– "दोधकमिच्छति भत्रितयाद्गौ।" तथा चोक्तं क्षेमेन्द्रेण– "भकारत्रयसंयुक्तमन्ते गुरुयुगान्वितम् । कथितं दोधकं नाम वृत्तमेकादशाक्षरम् ।" (सुवृत्ततिलके १/२१) ॥

अन्वय– (हे) अहीननितम्बे ! प्रकटस्मरसारे ! यत्र आद्यचतुर्थं सप्तमकं दशमं च तथाऽन्त्यं गुरु (भवेत्) तन्ननु दोधकवृत्तं कथितम् ॥

स्मृतिव्याख्या– एकादशाक्षर वृत्त में यदि प्रथम, चतुर्थ, सप्तम, दशम तथा एकादश अक्षर गुरु हों तो वह दोधक नामक छन्द कहा जाता है। आचार्य पिङ्गल ने कहा है कि यदि तीन भगण और दो गुरू हों तो उसे दोधकवृत्त कहा जाता है–

१. "दोधकं भौ भ्गौ ग् ।" (पिङ्गलसूत्र ६/२४)

अन्य छन्दःशास्त्र के ग्रन्थों में दोधक छन्द के जो लक्षण दिये गये हैं उन्हें यहाँ उद्धृत किया जाता है–

२. दोधकवृत्तमिदं भभभाद्गौ"– (वृत्तरत्नाकर ३/३३)
३. दोधकमिच्छति भत्रितयाद्गौ"– (छन्दोमञ्जरी २/५१)
४. भकारत्रयसंयुक्तमन्ते गुरु गान्वितम् ।
कथितं दोधकं नाम वृत्तमेकादशाक्षरम् ॥ (सुवृत्ततिलके १/२१)

---

१. –'महीनमते'– इतिपाठान्तरम् –'मिहाक्षरयुक्तं'– इतिपाठान्तरम् ।
२. छन्दसि यत्र गुरुत्वसमेतम्' – इति पाठान्तरम् ।
३. 'प्रकटस्मृतिशक्ते'– इति पाठान्तरम् ।

उदाहरण[१]—
भ० भ० भ० गु०गु०
आंद्यंचंतुंर्थं मंहींनंनिंतंम्बें —— प्रथम पाद
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११

भ० भ० भ० गु०गु०
संसंमंकं दंशंमं चं तंथांन्त्यंम्। —— द्वितीय पाद
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११

यहाँ अन्य पादों में पूर्ववत् लघु गुरु की व्यवस्था रहती है।

अथेन्द्रवज्रामाह

यस्यां[२] त्रिषट्सप्तममक्षरं स्याद्ध्रस्वं सुजङ्घे[३] नवमं च तद्वत् ॥
गत्या विलज्जीकृतहंसकान्ते तामिन्द्रवज्रां ब्रुवते कवीन्द्राः ॥२१॥

श्रुतिः—'यस्या' मिति वृत्तं लक्ष्यत इन्द्रवज्रानाम। हे सुजङ्धे! हे सुष्ठुजङ्घे! यस्या यस्मिन् वृत्ते त्रिषट्सप्तमं तृतीयं षष्ठं सप्तममक्षरं तद्वन् नवमं नवमाक्षरं ह्रस्वं लघु स्याद् भवेत् । हे गत्या विलज्जीकृतहंसकान्ते ! गमनेन विलज्जीकृता हंसस्य कान्ता यया सा तत्सम्बुद्धौ हे गमनविलज्जीकृतहंसि ! तामेहादृर्शी वृत्तिं कवीन्द्राः कविश्रेष्ठा इन्द्रवज्रां ब्रुवते कथयन्ति। एतल्लक्षणमुक्तं पिङ्गलसूत्रे (६/२१)– "इन्द्रवज्रा तो ज्गौ ग् ।" बृत्तरत्नाकरे (३/२८) ऽप्युक्तम्– "स्यादिन्द्रवज्रा यदि तौ जगौगः ।" एवमेव प्राप्यते छन्दोमञ्जर्यामपि तथा चोक्तं सुवृत्ततिलके (१/१८) तकाराभ्यां जकारेण युक्तं गुरुयुगेन च। इन्द्रवज्राभिधं प्राहुर्वृत्तमेकादशाक्षरम् ।।" इन्द्रवज्रालक्षणं निगदितं वृत्तमुक्तावल्याम् (३/१३९)– "यस्यां तकारद्वितयं जकारः प्रान्ते निधेयं गुरुवर्णयुग्मम्। मात्राभिरष्टादशसम्मिता सा सैकादशार्णा जयतीन्द्रवज्रा।।"

अन्वय– (हे) सुजङ्घे ! यस्यां त्रिषट्सप्तममक्षरं तद्वत् नवमं च ह्रस्वं स्यात्। (हे) गत्या विलज्जीकृतहंसकान्ते ! कवीन्द्राः ताम् इन्द्रवज्रां ब्रुवते।

---

१. द्वितीयोदाहरण— दोधकमर्थविरोधकमुग्रं स्त्रीचपलं युधि कातरचित्तम् ।
स्वार्थपरं मतिहीनममात्यं मुञ्चति यो नृपतिः स सुखी स्यात् ।।

२. 'यत्र' इति पाठान्तरम्।

३. 'तु वृत्ते'– इतिपाठातरम्। "ह्रस्वत्वयुक्तं"– इति पाठान्तरम् ।

४. "मत्या विलज्जीकृतवाक्पते हे'– इति पाठान्तरम् ।
'श्रीकालिदासादिकवीन्द्रमान्याम्'– इति पाठान्तरम् ।

५. 'बुधेन्द्राः'– इति पाठान्तरम् ।

स्मृतिव्याख्या–जिस छन्द के प्रत्येक पाद में एकादश अक्षर होते हैं, उनमें तृतीय षष्ठ, सप्तम और नवमवर्ण ह्रस्व होंतो कविश्रेष्ठ उसे इन्द्रवज्रा नामक वृत्त कहते हैं। पिङ्गल सूत्र, वृत्तरत्नाकर और छन्दोमञ्जरी में इस छन्द का लक्षण इस प्रकार बतलाया गया है कि जिसके प्रत्येक चरण में दो तगण, एक जगण तथा दो गुरु क्रम से हों तो उसे इन्द्रवज्राछन्द कहते हैं–

१. "इन्द्रवज्रा तौ ज् गौ ग् ।"– (पिङ्गल सूत्र ३/२१)

२. "स्यादिन्द्रवज्रा यदि तौ जगौ गः"– (वृत्तरत्नाकर ३/२८, तथा छन्दोमञ्जरी २/४१)

'सुवृत्त तिलक' और 'वृत्तमुक्तावली' में भी इन्द्रवज्राछन्द के लक्षण दिये गये हैं, यथा–

"तकाराभ्यां जकारेण युक्तं गुरुयुगेन च ।
इन्द्रवज्राभिधं प्राहुर्वृत्तमेकादशाक्षरम् ॥"
–(सुवृत्ततिलक १/१८)

इसी प्रकार वृत्तमुक्तावली (३/१३९) का लक्षण भी प्राप्त होता है, इसे संस्कृत टीका में देखना चाहिए।

उदाहरण[१]–

त० त० ज० ग० ग०
यस्यां त्रिषट्सप्तममक्षरं स्याद् —— प्रथम पाद
१ २ ३ ४ ५६७८९१० ११

त० त० ज० ग०ग०
ह्रस्वं सुजङ्घे नवमं च तद्वत् । —— द्वितीय पाद।
१२ ३४ ५ ६७८ ९१०११

उपर्युक्त चरणानुसार इन्द्रवज्रा के अन्य पादों में गणों की व्यवस्था होती है।

अथोपेन्द्रवज्रामाह

यदीन्द्रवज्राचरणेषु पूर्वे भवन्ति वर्णा लघवः सुवर्णे[२] !
अमन्दमाद्यन्मदने तदानीमुपेन्द्रवज्रा कथिता कवीन्द्रैः ॥२२॥

---

१. द्वितीयोदाहरण– ये दुष्ट लोका इह भूमिलोके द्वेषं व्यधुर्गोद्विजदेवसङ्घे ।
तानिन्द्रवज्रादपि दारुणाङ्गान् व्याजीवयद्यः सततं नमस्ते ॥

२. 'कदाचित्'– इतिपाठान्तरम् । 'लघुतासमेता'– इति पाठान्तरम् ।

३. 'कुशाग्रवत् तीक्ष्णमते'– इति पाठान्तरम् ।
'अमन्दविद्याविदितैः'– इति पाठान्तरम् ।

श्रुतिः– हे सुवर्णे ! गौराङ्गि ! अमन्दमाद्यन्मदने ! अमन्दं बहुलं माद्यन् मुदितां प्राप्नुवन् मदनः कामो यस्यां सा तत्सम्बुद्धौ। यदि चेद् इन्द्रवज्राचरणेषु इन्द्रवज्रापादेषु सर्वेषु पूर्वे वर्णा आद्याक्षराणि लघवो ह्रस्वानि भवन्ति तदानीं तर्हि कवीन्द्रैः कविप्रवरैरुपेन्द्रवज्रा कथिताऽभिहिता। उपेन्द्रवज्राछन्दोलक्षणमुक्तं पिङ्गलसूत्रे– "उपेन्द्रवज्रा ज् तौ ज् गौग्।" (पिङ्गलसूत्र ६/२२) केदारभट्टेनाऽपि निगदितम्– "उपेन्द्रवज्रा जतजास्ततो गौ।" (वृत्तरत्नाकरे ३/२९) छन्दोमञ्जर्यां (२/४२) लक्षणमुक्तमस्य– "उपेन्द्रवज्रा प्रथमे लघौ सा।" तथा चोक्तं क्षेमेन्द्रण–

"जतजैर्गुरुयुग्मेन संसक्तैरुपलक्षितम् ।
वदन्त्युपेन्द्रवज्राख्यं वृत्तमेकादशाक्षरम् ॥"

(सुवृत्ततिलके १/१९)

श्रुतबोधानुरूपमेवोक्तं वृत्तमुक्तावल्यां तद् यथा– "यदीन्द्रवज्रा लघुवर्णवक्त्रा विधीयते नागपतेर्निदेशात् । उपेन्द्रवज्रेति तदा कवीन्द्रैर्विरच्यते चारुकवित्वकीर्त्यै ॥" (वृत्तमुक्तावल्यां- ३/१४४)॥

अन्वय– (हे) सुवर्णे ! अमन्दमाद्यन्मदने । यदि इन्द्रवज्राचरणेषु पूर्वे वर्णा लघवो भवन्ति, तदानीं कवीन्द्रैः उपेन्द्रवज्रा कथिता।

स्मृतिव्याख्या– यदि इन्द्रवज्रा छन्द के चारों पादों में प्रथम वर्ण लघु हो तो श्रेष्ठ कवियों द्वारा उसे उपेन्द्रवज्रा छन्द कहा जाता है। इसमें एकादश वर्ण प्रत्येक चरण में रखे जाते हैं। आचार्य पिङ्गल तथा क्षेमेन्द्र आदि ने उपेन्द्रवज्रा का लक्षण बतलाते हुए लिखा है कि यदि प्रत्येक चरण में एक जगण, एक तगण और एक जगण तथा दो गुरु क्रम से हों तो उसे उपेन्द्रवज्रा छन्द कहा जायगा । इन आचार्यों की परिभाषाएं यहाँ उद्धृत की जाती हैं–

१. "उपेन्द्रवज्रा ज् तौ ज् गौ ग् ।" (पिङ्गलसूत्र ६/२२)
२. "उपेन्द्रवज्रा जतजास्ततो गौ"– (वृत्तरत्नाकर ३/२९)
३. "उपेन्द्रवज्रा प्रथमे लघौ सा"– (छन्दोमञ्जरी २/४२)
४. जतजैर्गुरुयुग्मेन संसक्तैरुपलक्षितम् ।
वदन्त्युपेन्द्रवज्राख्यं वृत्तमेकादशाक्षरम् ॥ (सुकृत्ततिलक १/१९)
५. यदीन्द्रवज्रा लघुवर्णवक्त्रा विधीयते नागपतेर्निदेशात् ।
उपेन्द्रवज्रेति तदा कवीन्द्रैर्विरच्यते चारुकवित्वकीर्त्यैः॥ (वृत्तमुक्तावली ३/१४४)

उदाहरण[१]— ज० त० ज० गु०गु०
यदीन्द्र वज्राचरणेषु पूर्वे — प्रथम पाद
१२ ३ ४ ५६७८९१०११
ज० त० ज० गु०गु०
भवन्ति वर्णा लघवः सुवर्णे । — द्वितीय पाद।
१२ ३ ४ ५ ६७८ ९१०११

अन्य चरणों में भी इसी प्रकार लघु गुरु की व्यवस्था उपेन्द्रवज्रा छन्द में होती है।

अथोपजातिमाह

यत्र द्वयोरप्यनयोस्तु पादा भवन्ति सीमन्तिनि[२] चन्द्रकान्ते ।
विद्वद्भिराद्यैः परिकीर्तिता सा प्रयुज्यतामित्युपजातिरेषा ॥२३॥

श्रुतिः— 'यत्रे'ति लक्ष्यत उपजातिः। हे सीमन्तिनि ! सुष्ठुकेशवेशे ! चन्द्रकान्ते ! शशिप्रभे! यत्र यस्मिन् वृत्तेऽनयोरिन्द्रवज्रोपेन्द्रवज्रयोर्द्वयोरुभयोरपि पादाश्चरणा भवन्ति क्रमेण। तद्यथा प्रथमे तृतीये चेन्द्रवज्रापादौ द्वितीये चतुर्थे चोपेन्द्रवज्राचरणौ स्याताम् । एतद्वृत्तमाद्यैश्चिरन्तनैः पिङ्गलादिभिर्विद्वद्भिः छन्दःशास्त्रज्ञैरुपजाति'रेतन्नाम्नी वृत्तजातिः परिकीर्तिता प्रतिपादिता सा प्रयुज्यतां विरच्यताम्। अस्योपजातेर्लक्षणमुक्तं पिङ्गलाचार्येण— "आद्यन्तावुपजातयस्ताः" (पिङ्गलसूत्रे ६/२३) वृत्तरत्नाकरे छन्दोमञ्जर्याञ्चोक्तम्—

"अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥"
(वृत्तरत्नाकरे ३/३१)

तथा चोक्तं क्षेमेन्द्रेण— "पदानन्तरविन्यासयोगैर्बहुभिरेतयोः। वैचित्र्यजातिरुचिरा भवन्त्येवोपजातयः॥(सुवृत्ततिलके १/२०) एतत्क्षेमेन्द्रमतानुसारमिन्द्रवज्रोपेन्द्रवज्रयोश्चरण-क्रमोऽत्र नोऽपेक्षते। चतुर्षु पादेषु चेदेकोऽपि पाद इन्द्रवज्रावृत्तस्योपेन्द्रवज्रावृत्तस्य वा

---

१. द्वितीयोदाहरण— उपेन्द्रवज्रादिमणिच्छटाभिर्विभूषणानां छुरितं वपुस्ते।
स्मरामि गोपीभिरुपास्यमानं सुरद्रुमूले मणिमण्डपस्थम् ॥

२. "सद्वृत्ततयाऽतिकान्त"— इति पाठान्तरम् ।
"तावन्मिलिता मिथस्ते"— इति पाठान्तरञ्च ।

स्यात्तर्हि वृत्तिरेषा भवत्युपजातिः। अपि च केचन स्वागतारथोद्धतयोरिन्द्रवंशावंशस्थयोश्च मिथः पादमिश्रितेन निर्मितां जातिमुपजातिं वदन्ति। तत्सर्वमत्र विस्तरभिया नोदितम् । उपजातिलक्षणं निगदितं वृत्तमुक्तावल्याम्– "यत्रेन्द्रवज्रा प्रथमे तृतीये द्वितीयतुर्योर्यदुपेन्द्रवज्रा। सा प्राज्ञवर्यैरुपजातिरुक्ता मनोज्ञविच्छित्तिविशेषयुक्ता।। (वृत्तमुक्तावल्याम्– ३/१४६)

अन्वय– (हे) सीमन्तिनिं ! चन्द्रकान्ते ! यत्र अनयोर्द्वयोरपि तु पादा भवन्ति। आद्यैर्विद्वद्भिः परिकीर्त्तिता सा एषा उपजातिरिति प्रयुज्यताम् ।

स्मृतिव्याख्या– यदि छन्द के प्रथम और तृतीय पाद इन्द्रवज्रा के हों तथा द्वितीय और चतुर्थ चरण उपेन्द्रवज्रा के हों तो उसे उपजाति छन्द कहा जाता है। यह कथन प्राचीन छन्दःशास्त्र के मर्मज्ञों का है। यहाँ श्रुतबोधकार ने अग्रलिखित आख्यानकी छन्द का लक्षण लिखकर उपजाति को एक विशिष्ट प्रकार से उल्लिखित किया है, जिसमें इन्द्रवज्रा और उपेन्द्रवज्रा के पाद नियत चरणों में रखने का आग्रह है। इस तथ्य को वृत्तमुक्तावलीकार ने उपजाति का लक्षण देकर और अधिक स्पष्ट कर दिया है–

यत्रेन्द्रवज्रा प्रथमे तृतीये द्वितीयतुर्योर्यदुपेन्द्रवज्रा ।
सा प्राज्ञवर्यैरुपजातिरुक्ता मनोज्ञविच्छित्तिविशेषयुक्ता ॥

–(वृत्तमुक्तावली ३/१४६)

परन्तु 'वृत्तरत्नाकर', 'छन्दोमञ्जरी' तथा 'सुवृत्ततिलक' में बतलाया गया है कि इन्द्रवज्रा तथा उपेन्द्रवज्रा के एकाधिकचरणों का परस्पर प्राप्त होना उपजाति छन्द कहा जायगा। जैसा कि 'वृत्तरत्नाकर' (३/३१) में कहा गया है–

अनन्तरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ।
इत्थं किलान्यास्वपि मिश्रितासु वदन्ति जातिष्विदमेव नाम ॥

इस कथन के अनुसार अन्य छन्दों के चरणों का परस्पर मेल भी उपजाति नाम से अभिहित किया जायगा। इसीलिए स्वागता और रथोद्धता, इन्द्रवंशा तथा वंशस्थ, इन्द्रवंशा और उपेन्द्रवज्रा अथवा इन्द्रवज्रा आदि के मिश्रण से भी उपजाति छन्द का निर्माण होता है। कहीं-कहीं वसन्ततिलक और इन्द्रवज्रा अथवा वंशस्थ का भी मिश्रण दृष्टिगत होता है। इसे भी उपजाति छन्द की सञ्ज्ञा देगें । इस प्रकार छन्द-मिश्रण, तथा विभिन्न पादव्यवस्था के भेद से उपजाति के अनेक भेद हो सकते हैं। 'छन्दोमञ्जरी' में वृत्तरत्नाकर

के समान ही लक्षण दिया गया है। आचार्य पिङ्गल ने उपजाति का यह लक्षण दिया है– 'आद्यन्तावुपजातयस्ताः।" (पिङ्गलसूत्र ६/२३) आचार्य क्षेमेन्द्र ने भी उपजाति का लक्षण उद्धृत किया है–

पदानन्तरविन्यासंयोगैर्बहुभिरेतयोः ।
वैचित्र्यजातिरुचिरा भवन्त्येवोपजातयः ॥

–(सुवृत्ततिलक १/२०)

यहाँ 'सुवृत्ततिलक' में भी वृत्तरत्नाकर के समान ही उपजाति छन्द का कथन किया गया है।

उदाहरण[1] –

त० त० ज० गु०गु०		
यत्र द्वयोरप्यनयोस्तु पादौ	——	इन्द्रवज्रापाद (प्रथम)
ज० त० ज० गु०गु०		
भवन्ति सीमन्तिनि चन्द्रकान्ते	——	उपेन्द्रवज्रापाद (द्वितीय)
त० त० ज० गु० गु०		
विद्वद्भिराद्यैः परिकीर्तिता सा	——	इन्द्रवज्रा पाद (तृतीय)
ज० त० ज० गु०गु०		
प्रयुज्यतामित्युपजातिरेषा ।	——	उपेन्द्रवज्रापाद (चतुर्थ)

अथाख्यानकीमाह

आख्यानकी स्यात्प्रकटीकृतार्थे[2] यदीन्द्रवज्राचरणः पुरस्तात् ।
उपेन्द्रवज्रा चरणास्त्रयोऽन्ये मनीषिणोक्ता विपरीतपूर्वा ॥२४॥

श्रुतिः– आख्यानकीलक्षणमुच्यत 'आख्यानकी'ति। हे प्रकटीकृतार्थे ! प्रकटीकृत उत्पादितोऽर्थः कामरूपो यस्यां सा तत्सम्बुद्धौ। यदि पुरस्तात् प्रथमं तु स्याद् भवेदिन्द्रवज्रा-चरणः, अन्ये च शेषास्त्रयाः पादा उपेन्द्रवज्राया भवेयुस्तदा मनीषिणा छान्दसीयेन

---

१. द्वितीयोदाहरण– पाटीरवाटीषु कृतप्रचारस्तरङ्गिणीवारिभवद्विहारः ।
मल्लीलताऽऽलिङ्गनमोदधीरः प्रवाति कान्तेऽद्य सुखं समीरः ॥

२. 'बुधमार्गपाणिन्'– इति पाठान्तरम् ।

विपरीतपूर्वाऽऽख्यानकी एतन्नाम्नी वृत्तजातिरुक्ताऽभिहिता। वृत्तरत्नाकरादौ नाऽस्य लक्षणमुक्तमुपजातिष्वेवाऽन्तर्भावशक्यत्वात्। उपजातिच्छन्दसश्चतुर्दशभेदेष्वेषाऽप्यायाति, यथोक्तं वृत्तरत्नाकरस्य नारायणभट्टीयटीकायाम्–

एकत्र पादे चरणद्वये वा पादत्रये वाऽन्यतरः स्थितश्चेत् ।
तयोरिहान्यत्र तदोहनीयाश्चतुर्दशोक्ता उपजातिभेदाः ॥
(वृत्तरत्नाकरे-नारायणभट्टीये पृ० ८१)

इत्यनुसारमेषाऽऽख्यानकी लक्षणेनोपजातौ गच्छत्यन्तर्भावत्वम् । पिङ्गलसूत्रे लक्षणं कथितम्– "आख्यानिकी तौ ज् गौ ग् ज तौ जगौ ग्" (पि०सू० ५/३८)। वृत्तमुक्तावल्यामस्य वृत्तस्य लक्षणमेवं निगदितम्–

आख्यानकीं तां प्रवदन्ति नित्यं यदीन्द्रवज्राचरणेन युक्तान् ॥
उपेन्द्रवज्राचरणान् वहेत् त्रीन् विशेष विच्छित्तिमतः कवीन्द्राः ॥
(वृत्तमुक्तावल्याम् ३/१४८)

अन्वय– (हे) प्रकटीकृतार्थे ! यदि पुरस्ताद् इन्द्रवज्राचरणः स्याद् अन्ये च त्रयः उपेन्द्रवज्राचरणाः (भवेयुः), (तर्हि) मनीषिणा विपरीतपूर्वाऽऽख्यानकी उक्ता।

स्मृतिव्याख्या–जिस छन्द में प्रथमचरण इन्द्रवज्रा का हो और अन्य तीन चरण उपेन्द्रवज्रा के हों तो विद्वान् कवि उसे आख्यानकी छन्द के नाम से अभिहित करते हैं।

यद्यपि यहाँ आख्यानकी का लक्षण वृत्तरत्नाकरादि ग्रन्थों के अनुसार उपजाति में ही अन्तर्भूत हो जाता है। जैसा कि वृत्तरत्नाकर की 'नारायणभट्टीय' टीका में कहा गया है कि इन्द्रवज्रा तथा उपेन्द्रवज्रा का एक भी चरण में प्रयोग क्यों न हो उसे उपजाति छन्द ही कहा जायगा। इस प्रकार उपजाति छन्द के चौदह भेद हो जाते हैं–

एकत्र पादे चरणद्वये वा पादत्रये वाऽन्यतरः स्थितश्चेत् ।
तयोरिहान्यत्र तदोहनीयाश्चतुर्दशोक्ता उपजातिभेदाः ॥
(वृत्तरत्नाकर-नारायणभट्टीय-टीका, पृ० ८१)

तथापि पिङ्गलादि आचार्यों के द्वारा उक्त होने के कारण यहाँ श्रुतबोधकार ने आख्यानकी का लक्षण किया है। वृत्तमुक्तावली में भी श्रीकृष्णभट्ट ने आख्यानकी का लक्षण श्रुतबोध के अनुसार ही किया है, यथा–

"आख्यानकीं तां प्रबदन्ति नित्यं यदीन्द्रवज्राचरणेन युक्तान् ।
उपेन्द्रवज्राचरणान् वहेत् त्रीन् विशेषविच्छित्तिमतः कवीन्द्राः ॥"
(वृत्तमुक्तावली ३/१४८)

उपजाति तथा आख्यानकी में भेद प्रदर्शित करने हेतु दोनों के लक्षण पृथक्त्वेन किये गये हैं। आख्यानकी छन्द प्राचीन आचार्यों के द्वारा भी मान्य है यथा पिङ्गलसूत्र (५/३८) में आख्यानिकी तौ ज् गौ ग् जतौ जगौ ग् ।"

उदाहरण[१]— त० त० ज० गु०गु०
आख्यानकी स्यात्प्रकटीकृतार्थे — इन्द्रवज्रापाद ।
ज० त० ज० गु०गु०
यदीन्द्रवज्राचरणः एरस्ताद् — उपेन्द्रवज्रापाद।
ज० त० ज० गु० गु०
उपेन्द्रवज्रा चरणास्त्रयोऽन्ये — उपेन्द्रवज्रापाद।
ज० त० ज० ग०ग०
मनीषिणोक्ता विपरीतपूर्वा — उपेन्द्रवज्रापाद।

यहाँ प्रथमपाद इन्द्रवज्रा का तथा शेष तीन पाद उपेन्द्र वज्रा के हैं, अतः इसे आख्यानकी छन्द कहेगें।

अथ रथोद्धतामाह

आद्यमक्षरमतस्तृतीयकं सप्तमं च नवमं तथान्तिमम् ।
दीर्घमिन्दुमुखि यत्र[३] जायते तां वदन्ति कवयो रथोद्धताम् ॥२५॥

श्रुतिः— 'आद्ये'त्यादिना रथोद्धतां लक्षयति। हे इन्द्रमुखि ! चन्द्रानने ! यत्र यस्मिन् छन्दसि

---

१. द्वितीयोदाहरण— दीपाः स्थितं वस्तु विभावयन्ति ।
कुलप्रदीपास्तु भवन्ति केचित् ।
चिरव्यतीतानपि पूर्वजान्ये
प्रकाशयन्ति स्वगुणप्रकर्षात् ॥

२. 'दीर्घमस्तु ननु'— इति पाठान्तरम् । 'दीर्घतां भजति'— इति पाठान्तरम् ।

३. 'यत्र सन्मते'— इति पाठान्तरम् । 'यत्र पूजिताः' इति पाठान्तरम् ।

वर्णा एकादश भवन्ति चरणेषु, तेषु वर्णेष्वाद्यं प्रथमं तृतीयकं तृतीयं सप्तमं नवमं तथान्तिम-मेकादशाक्षरं दीर्घं द्विमात्रिकं जायते क्रियते तां वृत्तजातिं कवयो विद्वत्कोविदा रथोद्धतां वदन्ति कथयन्ति। पिङ्गलसूत्रे (६/२८) ऽस्य लक्षणमुक्तम्– "रथोद्धता र्नौ र्लौग्।" वृत्तरत्नाकरेऽपि रथोद्धतालक्षणं निगदितम्– "रान्नराविह रथोद्धता लगौ।" (वृत्तरत्नाकरे ३/३८) अपि चोक्तं छन्दोमञ्जयमि् (२/४९)– "रात्परैर्नरलगै रथोद्धता।" तथोक्तं सुवृत्ततिलके (१/२३)– "रनैरन्वितं युक्तं लघुना गुरुणा तथा। ख्यातं रथोद्धतानाम वृत्तमेकादशाक्षरम्।" एवमेवोक्तं श्रीकृष्णभट्टेन– "रोत्तरं नगणरौ लघुर्गुरुः कार्यमित्युदयशालि यत्पदम्। सा फणीन्द्रमुखपङ्कजोद्गता राजते सुवितता रथोद्धता।। (वृत्तमुक्तावल्याम् ३/१२९)

अन्वय– (हे) इन्द्रमुखि! यत्राऽऽद्यम् अतः तृतीयकं सप्तमं नवमं तथा च अन्तिममक्षरं दीर्घ जायते, कवयः तां रथोद्धतां वदन्ति।

स्मृतिव्याख्या–जिसके प्रत्येक चरण में ग्यारह अक्षर हों तथा इनमें प्रथम, तृतीय, सप्तम, नवम और एकादश वर्ण दीर्घ हों तो उसे कविगण रथोद्धता छन्द के नाम से अभिहित करते हैं। रथोद्धता छन्द का लक्षण आचार्य पिङ्गल ने गणानुसार लिखा है और बतलाया है कि जिस छन्द के प्रत्येक चरण में रगण, नगण तथा लघु, गुरु क्रम से हों उसे रथोद्धता छन्द कहा जाता है– "रथोद्धता र्नौ र्लौग्।" (पिङ्गल सूत्र ६/२८) वृत्तरत्नाकर, छन्दोमञ्जरी तथा सुवृत्ततिलक में भी रथोद्धता का यही लक्षण शब्दान्तर से बतलाया गया है। यथा–

"रान्नराविह रथोद्धता लगौ ।"– (वृत्तरत्नाकर ३/३८)
"रात्परैर्नरलगै रथोद्धता।"– (छन्दोमञ्जरी २/४९)
"रनैरन्वितं युक्तं लघुना गुरुणा तथा ।
ख्यातं रथोद्धता नाम वृत्तमेकादशाक्षरम् ।।"– (सुवृत्ततिलक १/२३)

'वृत्तमुक्तावली' में भी रथोद्धता का लक्षण उद्धृत है–

"रोत्तरं नगणरौ लघुर्गुरुः कार्यमित्युदयशालि यत्पदम् ।।
सा फणीन्द्रमुखपङ्कजोद्गता राजते सुविततता रथोद्धता ।।" (वृत्तमुक्तावली ३/१२९)

उदाहरण[1]– र० न० र० ल०गु०
आद्यमक्षरमतस्तृतीयकं —— प्रथम पाद।
१ २ ३ ४५६७ ८ ९१०११

---

१. द्वितीयोदाहरण– राधिका दधिविलोडनस्थिता कृष्णवेणुनिनदैरथोद्धता ।
यामुनं तटनिकुञ्जमञ्जसा सा जगाम सलिलाहृतिच्छलात् ।।

र० न० र० ल०गु०
सप्तमं च नवमं तथान्तिमम् —— द्वितीय पाद।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११

तृतीय तथा चतुर्थ चरण भी पूर्वोक्तानुसार समझने चाहिए।

अथ स्वागतामाह

अक्षरं च नवमं दशमं चेद्व्यत्ययाद्भवति यत्र विनीते[1] !
प्रोक्तमेणनयने[2] यदि सैव स्वागतेति कविभिः कथिताऽसौ ॥२६॥

श्रुतिः– 'अक्षर' मिति स्वागता लक्ष्यते। हे विनीते ! हे विनम्रस्वभावे ! एणनयने ! हरिणाक्षि! यत्र यस्मिन् वृत्ते व्यत्ययाद् वैपरीत्येन नवममक्षरं दशमवद्दशमं नवमवत् स्यात्। नवमाक्षरं लघु दशमाक्षरं गुरु भवेताम्। आशयोऽयमत्र वर्तते यद् रथोद्धतावृत्ते नवममक्षरं गुरु भवति दशमं चाऽक्षरं लघु स्यात्, किन्तु स्वागतायां तु नवममक्षरं लघु दशमं चाऽक्षरं गुरु भवति। एतद्वृत्तं स्वागतेति नाम्ना निगदितं कविभिः काव्यकृद्भिरिति। एतल्लक्षणं पिङ्गलच्छन्दःसूत्रे (६/२९) प्रोक्तम्– "स्वागता र्नौ भ्गौग्।।" तथा च वृत्तरत्नाकरे (३/३९)– "स्वागतेति रनभाद्गुरुयुग्मम्।" छन्दोमञ्जर्याम् (२/५०)– "स्वागता रनभगैर्गुरुणा च।" क्षेमेन्द्रेणोक्तम्– "गुरुद्वययुतेरन्ते रनभैरुपलक्षिता। गदितं स्वागता नाम वृत्तमेकादशाक्षरम्।" (सुवृत्ततिलके १/२४) श्रुतबोधानुरूपमेव स्वागताया लक्षणमुक्तं वृत्तमुक्तावल्याम्– "अक्षरं तु नवमं दशमं चेद् व्यत्ययेन निहितं खलु यस्याम्। एतदेव हि रथोद्धतवृत्तं स्वागतेति कविभिःकृतनाम।" (वृत्तमुक्तावल्याम् ३/१३१)

अन्वय–हे विनीते ! एणनयने ! यत्र नवमं दशमं चाऽक्षरं चेद् व्यत्ययात् प्रोक्तं भवति यदि सैवाऽसौ कविभिः स्वागतेति कथिता।

स्मृतिव्याख्या–जहाँ रथोद्धता छन्द के नवम तथा दशम अक्षर विपरीत हों अर्थात् रथोद्धता में नवम अक्षर गुरु तथा दशम लघु होता है, इसके विपरीत नवम अक्षर जहाँ लघु और दशम वर्ण गुरु हो तो उसे कवि-जन स्वागता छन्द कहते हैं। 'पिङ्गलसूत्र' में स्वागता का लक्षण देते हुए कहा गया है कि जहाँ रगण, नगण, भगण तथा दो गुरु हों तो उसे स्वागता

---

१. 'प्राक्तनवृत्ते'– इति पाठान्तरम्। 'हि वृत्ते'– इति पाठान्तरम्।
२. 'प्रोक्तमुत्तममते'– इति पाठान्तरम्। 'पूर्ववर्णितसमं'– इति पाठभेदः।

छन्द कहा जाता है– "स्वागता र्नौ भ्गौग् ।" (पिङ्गलसूत्र ६/२९) केदारभट्ट ने वृत्तरत्नाकर (३/३९) में तथा गङ्गादास ने छन्दोमञ्जरी में स्वागता का यही लक्षण उद्धृत किया है–

"स्वागतेति रनभाद्गुरुयुग्मम् ।" (वृत्तरत्नाकर ३/३९)

"स्वागता रनभगैर्गुरुणा च।" (छन्दोमञ्जरी २/५०)

सुवृत्त तिलक में आचार्य क्षेमेन्द्र ने भी स्वागता का लक्षण समुद्धृत किया है– "गुरुद्वययुतैरन्ते रनभैरुपलक्षिता। गदितं स्वागता नाम वृत्तमेकादशाक्षरम् ।"– (सुवृत्ततिलक १/२४) वृत्तमुक्तावली में भी इसका लक्षण दिया गया है, जो श्रुतबोधकार के अनुसार ही है– "अक्षरं तु नवमं दशमं चेद् व्यत्ययेन निहितं खलु यस्याम्। एतदेव हि रथोद्धतवृत्तं स्वागतेति कविभिः कृतनाम।" (वृत्तमुक्तावली ३/१३१)

प्रायः सर्वत्र रथोद्धता छन्द का लक्षण यही दिया गया है।

उदाहरण[1]– र० न० भ० गु०गु०
अक्षरं च नवमं दशमं चेद् —— प्रथम पाद।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११
र० न० भ० गु०गु०
व्यत्ययाद्भवति यत्र विनीतैः। —— द्वितीय पाद।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११

स्वागता के अन्य चरणो को भी पूर्ववत् समझना चाहिए।

अथ वैश्वदेवीमाह

ह्रस्वो वर्णः स्यात्ससमो यत्र बाले[2]! तद्वद्बिम्बोष्ठि न्यस्त एकादशाद्यः । बाणैर्विश्रामस्तत्र चेद्वा तुरङ्गैर्नाम्ना निर्दिष्टा सुभ्रु[3] सा वैश्वदेवी ॥२७॥

श्रुतिः– 'ह्रस्व' इति वैश्वदेवी नाम वृत्तं लक्षयति। हे बाले ! षोडशि ! विम्बोष्ठि ! पक्वबिम्बफलसदृशरक्ताधरोष्ठि ! यत्र यस्मिन् वृत्ते ससमो वर्णो ह्रस्वो लघुः स्यात् तद्वद् एवमेवैकादशाद्यो दशमो वर्णोऽपि ह्रस्वो न्यस्तो निक्षिप्तः। तथा च बाणैः पञ्चभिस्तुरङ्गैः सप्तभिश्चेद् यदि विश्रामो यतिः स्यात् तर्हि सुभ्रु ! सुष्ठु भ्रुवौ यस्याः सा तत्सम्बुद्धौ ! सा

---

१. द्वितीयोदाहरण– रत्नभङ्गविमलैर्गुणतुङ्गैरर्थिनामभिमतार्पणसक्तैः।
स्वागताभिमुखनम्रशिरस्कैर्जीव्यते जगति साधुभिरेव ॥

२. 'तद्वच्छन्दोज्ञानार्थिन्'– इति पाठान्तरम् ।

३. 'वत्स'– इति पाठान्तरम् ।

वृत्तजातिर्वैश्वदेवी नाम्ना निर्दिष्टा कथिता वर्तते। एतस्मिञ्छन्दसि द्वादशाक्षराणि प्रत्येकचरणे भवन्ति। पिङ्गलसूत्रेऽस्य लक्षणं निगदितम्– **"वैश्वदेवी मौ याविन्द्रिय ऋषयः।"** (पि०सू०६/४७) तदुक्तं वृत्तरत्नाकरे (३/६२)– **"पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ।"** एवमेव कथितं छन्दोमञ्जर्याम् (२/६२)– **"बाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ ।"** आचार्येण क्षेमेन्द्रेण नाऽस्य लक्षणमलेखि सुवृत्ततिलके। नाऽस्य चर्चावृत्तमुक्तावल्यामेवोपलभ्यतेऽप्रसिद्धत्वाद् वृत्तस्य।

अन्वय– (हे) बाले ! बिम्बोष्ठि ! यत्र सप्तमो वर्णो ह्रस्वः स्यात् तद्वत् एकादशाद्यो (वर्णो ह्रस्वो) न्यस्तः। तत्र बाणैर्वा तुरङ्गैः विश्रामश्चेत् (तर्हि) सुभ्रु ! सा वैश्वदेवी नाम्ना निर्दिष्टा।

स्मृतिव्याख्या– प्रत्येक चरण में द्वादश अक्षर हों तथा सभी चरणों में सप्तम और दशम वर्ण ह्रस्व हों। पाँच तथा सात अक्षरों पर यति की व्यवस्था हो तो वह वैश्वदेवी नामक छन्द कहा जाता है। इस छन्द के विषय में 'सुवृत्ततिलक' और वृत्तमुक्तावली में कोई चर्चा प्राप्त नहीं होती है। आचार्य पिङ्गल ने लिखा है। कि यदि प्रत्येक चरण में दो मगण तथा दो यगण हों तो उसे वैश्वदेवी छन्द कहा जाता है। यहाँ पाँच तथा सात वर्णों पर विराम का भी उल्लेख किया गया है–

"वैश्वदेवी मौ याविन्द्रिय ऋषयः ।" (पि०सू० ६/४७)

'वृत्तरत्नाकर' तथा 'छन्दोमञ्जरी' में भी इसका लक्षण यही उद्धृत है–

१. **"पञ्चाश्वैश्छिन्ना वैश्वदेवी ममौ यौ"** (वृत्तरत्नाकर ३/६२)

२. **बाणाश्वैश्छिन्ना वैश्वदेवी ममौ यौ।"** (छन्दोमञ्जरी २/७२)

उदाहरण[१]**–**

म० म० य० य०
ह्रस्वौ वर्णौ स्यात्सप्तमो यत्र बाले — प्रथम पाद।
१ २ ३४ ५ ६७ ८ ९१० १११२

म० म० य० य०
तद्वद्बिम्बोष्ठि न्यस्त एकादशाद्यः — द्वितीय पाद।
१२ ३ ४ ५ ६ ७ ८ ९१०१११२

लघु-गुरु तथा गणों की व्यवस्था वैश्वदेवी के अन्य चरणों में भी इसी प्रकार समझनी चाहिए।

---

१. अर्चामन्येषां त्वं विहायाऽमराणामद्वैतेनैकं विष्णुमभ्यर्च्य भक्त्या ।
तत्राऽशेषात्मन्यर्चिते भाविनी ते भ्रातः ! सम्पन्नाऽऽराधना वैश्वदेवी ॥

अथ तोटकमाह

**सतृतीयकषष्ठमनन्तरते[1] ! नवमं विरतिप्रभवं गुरु चेत् ।
घनपीनपयोधरभारनते ! ननु तोटकवृत्तमिदं कथितम् ॥२८॥**

श्रुतिः– 'सतृतीयकेत्यादिना तोटकवृत्तं लक्ष्यते। हे अनन्तरते ! अनन्ताऽपरिमिता रतिर्यस्या सा तत्सम्बुद्धौ। हे घनपीनपयोधरभारनते ! कठिननिविडकुचभाराधिक्येन नम्रीभूते ! यस्मिन् वृत्ते सतृतीयकषष्ठ तृतीयषष्ठवर्णसहितं नवमं नवमाक्षरं विरतिप्रभवं द्वादशाक्षरं च गुरु दीर्घं स्याच्चेत् तर्हि, तोटकवृत्तं तोटकनामकं छन्दः कथितं प्रतिपादितं ननु निश्चयरूपेण। एतद्वृत्तं 'तोटकमिति नाम्ना प्रसिद्धमित्यर्थः। अत्रोक्तं पिङ्गलच्छन्दःसूत्रे (६/३७) ऽस्य लक्षणम्– **"तोटकं सः ।"** वृत्तरत्नाकरे (३/४८) प्रोक्तम्– **"इह तोटकमम्बुधिसैः प्रथितम्।"** तथोक्तं छन्दोमञ्जर्याम्-**"वद तोटकमब्धिसकारयुतम्।"** (छन्दोमञ्जर्याम् २/७०)। क्षेमेन्द्रोऽत्र ब्रूते-**"सकारैरन्वितं वृत्तं चतुर्भिर्युगपत्स्थितैः। उदितं तोटकं नाम वृत्तज्ञैर्द्वादशाक्षरम् ।"** (सुवृत्ततिलके १/२५)। श्रीकृष्णभट्टेनाऽस्य लक्षणं वृत्तमुक्तावल्यां व्यलेखि-**"अतिचारुसकारचतुष्कभृतं चरणं खलु यस्य विभाति कृतम्। इति तोटकवृत्तमिदं कथितं कविराजिविराजिगुणग्रथितम् ।"** (वृत्तमुक्तावल्याम् ३/१६६)।

अन्वय– (हे) अनन्तरते ! घनपीनपयोधरभारनते ! सतृतीयकषष्ठं नवमं विरतिप्रभवं (च) गुरु (स्यात्) चेत् (तर्हि) इदं तोटकवृत्तं ननु कथितम् ।

स्मृतिव्याख्या– तोटक छन्द में बारह अक्षर प्रत्येक चरण में रखे जाते हैं। प्रत्येक चरण में तृतीय, षष्ठ, नवम और द्वादश अक्षर गुरु रहते हैं। इसे तोटक छन्द की सञ्ज्ञा प्राप्त है। पिङ्गल सूत्र में कहा गया है। कि यदि चार सगण प्रत्येक चरण में हो तो उसे तोटक छन्द कहते हैं– **"तोटकं सः' (पिङ्गल सू० ६/३७)।** अन्य ग्रन्थों में तोटक वृत्त का यही लक्षण दिया गया है उनके लक्षण यहाँ उद्घृत किये जाते हैं–

१. 'इह तोटकमम्बुधिसैः प्रथितम्' (वृत्तरत्नाकर ३/४८)
२. 'वद तोटकमब्धिसकारयुतम्' (छन्दोमञ्जरी २/७०)
३. सकारैरन्वितं वृत्तं चतुर्भिर्युगपत्स्थितैः ।
उदितं तोटकं नाम वृत्तज्ञैर्द्वादशाक्षरम् ॥ (सुवृत्ततिलक १/२५)

---

१. –'मुदात्तमते'– इति पाठान्तरम् । . . . 'मिहाक्षरकं' इतिपाठान्तरम् ।
२. 'अधिपिङ्गलशास्त्रमुपात्तरते'– इति पाठान्तरम् ।
'कविभिः प्रथितैर्भुवनत्रितये'– इति पाठभेदः ।

४. अतिचारु सकारचतुष्कभृतं चरणं खलु यस्य विभाति कृतम् ।
इति तोटकवृत्तमिदं कथितं कविराजिविराजिगुणग्रथितम् ।
(वृत्तमुक्तावली ३/१६६)

उदाहरण[१]– स० स० स० स०
संतृतीयकषष्ठमनन्तरंतें —— प्रथम पाद ।
१२३४ ५६७८९१०१११२

स० स० स० स०
नवमं विरतिप्रभवं गुरु चेत् —— द्वितीय पाद ।
१२३ ४५६७८९ १०११ १२

इसी प्रकार तोटक छन्द के शेष चरणों में गुरु लघु की व्यवस्था जाननी चाहिए।

अथ भुजङ्गप्रयातमाह

यदाद्यं चतुर्थं तथा सप्तमं चेत् तथैवाक्षरं ह्रस्वमेकादशाद्यम् ।
शरच्चन्द्रविद्वेषिवक्त्रारविन्दे तदुक्तं कवीन्द्रैर्भुजङ्गप्रयातम् ॥२९॥

श्रुतिः– 'यदाद्यमिति भुजङ्गप्रयातं लक्ष्यते। हे शरच्चन्द्रविद्वेषिवक्त्रारविन्दे ! शारदीयपूर्णिमोदितचन्द्रस्य विद्वेषिवक्त्रं मुखमेवाऽरविन्दं कमलं यस्याः सा तत्सम्बुद्धौ। यदा चेद् आद्यं प्रथमं तथा चतुर्थं चतुर्थाक्षरं, सप्तमं सप्तमाक्षरं तथैव एवमेव एकादशाद्यं दशमाक्षरं हस्वं स्यादिति शेषः। तद् वृत्तं कवीद्रैः कविप्रवरैर्भुजङ्गप्रयातं नामोक्तं कथितम्। पिङ्गलाचार्येण लक्षणमस्य लिखितं– "भुजङ्गप्रयातं यः" (पि०सू०६/४३) छन्दोमञ्जर्यामप्युक्तम्– "भुजङ्गप्रयातं चतुभिर्यकारैः।" (छन्दोमञ्जर्याम् २/६९) वृत्तरत्नाकरे (३/५५) कथितम्– "भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः।" एतदेव लक्षणं भणितं वृत्तमुक्तावल्याम्– "चतुः सङ्ख्यका यस्य पादे यकाराः सदा मोदयन्ते समन्तादुदाराः। भुजङ्गप्रयाताभिधं वृत्तमेतत्सुधापातिहेतुः सतां मानसे तत् ।" (वृत्तमुक्तावल्याम् ३/१५६)

---

१. द्वितीयोदाहरण– त्यज तोटकमर्थनियोगकरं प्रमदाऽधिकृतंव्यसनोपहतम् ।
उपधाभिरशुद्धमतिं सचिवं नरनायक भीरुकमायुधिकम् ॥

२. 'दधद्भक्तिमाचार्यपादारविन्दे'– इति पाठभेदः
"जगन्मानितैःपण्डितैश्छान्दसीयैः'– इति पाठान्तरम् ।

३. 'तु वृत्तम्'– इति पाठान्तरम् ।

अन्वय– (हे) शरच्चन्द्रविद्वेषिवक्त्रारविन्दे! यदाद्यं चतुर्थं तथा सप्तमं तथैव एकादशाद्यमक्षरं ह्रस्वं चेत् (भवेत्) तदा कवीन्द्रैः तद् भुजङ्गप्रयातमुक्तम् ।

स्मृतिव्याख्या– जिस छन्द के प्रत्येक चरण में प्रथम, चतुर्थ, सप्तम तथा दशम वर्ण ह्रस्व हो और शेष आठ वर्ण दीर्घ हो तो उसे भुजङ्गप्रयात छन्द कहते हैं। इसमें प्रत्येक चरण १२-१२ अक्षरों का होता है। आचार्य पिङ्गल ने इस छन्द का लक्षण कहा है–"भुजङ्गप्रयातं यः।" (पि०सू० ६/४३) अर्थात् जिस वृत्त में चार यगण प्रत्येक पाद में रखे जायँ उसे भुजङ्ग प्रयात छन्द कहा जाता है। वृत्तरत्नाकर, छन्दोमञ्जरी, वृत्तमुक्तावली आदि ग्रन्थो में भी भुजङ्गप्रयात का यही लक्षण सुस्पष्टतः उद्धृत किया गया है–

१. 'भुजङ्गप्रयातं भवेद्यैश्चतुर्भिः।'– (वृत्तरत्नाकर ३/५५)

२. 'भुजङ्गप्रयातं चतुर्भिर्यकारैः'– (छन्दोमञ्जरी २/६९)

३. "चतुः सङ्ख्यका यस्य पादे यकाराः सदा मोदयन्ते समन्तादुदाराः।
भुजङ्गप्रयाताभिधं वृत्तमेतत्सुधापातिहेतुः सतां मानसे तत्।'
(वृत्तमुक्तावली ३/१५६)

उदाहरण[१]–

य० य० य० य०
यदाद्यं चतुर्थं तथा सप्तमं चेत् — प्रथम पाद।
१ २३ ४ ५६ ७ ८ ९ १० ११ १२

य० य० य० य०
तथैवाऽक्षरं ह्रस्वमेकादशाद्यम् — द्वितीय पाद।
१२३ ४५ ६ ७८ ९ १० ११ १२

शेष चरणों में लघु गुरु अथवा गणों की व्यवस्था इसी क्रम से रहेगी।

अथ द्रुतविलम्बितमाह

अयिकृशोदरि[२]! यत्र चतुर्थकं गुरुं च सप्तमकं दशमं तथा ।
विरतिजं[३] च तथैव विचक्षणैर्द्रुतविलम्बितमित्युपदिश्यते ॥३०॥

---

१. द्वितीयोदाहरणम्– सदारात्मजज्ञातिभृत्यो विहाय
स्वमेतं ह्रदं जीवनं लिप्समानः ।
मया क्लेशितः कालियेत्थं कुरु त्वम्,
भुजङ्ग ! प्रयातं द्रुतं सागराय ॥

२. 'वशंवद'– इति पाठान्तरम् । 'भवति छन्दसि'– इति पाठभेदः ।

३. 'विरतिगम्'– इति पाठान्तरम् ।

With Best Compliments
From Author and Publisher

श्रुतिः— 'अयि' इत्यादिना द्रुतबिलम्बितं लक्षयति। अयि हे कृशोदरि! कृशमुदरं यस्याः सा कृशोदरी तत्सम्बुद्धौ! क्षीणोदरि! यत्र वृत्ते यस्मिन् चतुर्थकं चतुर्थाक्षरं, सप्तमकं सप्तममक्षरं दशमं दशमाक्षरं च तथैव विरतिजं द्वादशमक्षरं च गुरु स्यात् चेत्तर्हि विचक्षणैर्विद्वज्जनै र्द्रुतबिलम्बितमेतन्नाम वृत्तमुपदिश्यतेऽभिधीयते। द्रुतबिलम्बितच्छन्दसो लक्षणं पिङ्गलच्छन्दः सूत्रेऽभिहितं तद् यथा— "द्रुतविलम्बितं न्भौ भ्रौ।" (पि०सू० ६/३६) वृत्तरत्नाकर (३/४९) छन्दोमञ्जर्यो (२/७४) रेतल्लक्षणमुक्तम्— "द्रुतविलम्बितमाह नभौभरौ।" क्षेमेन्द्रोऽपि लक्षणमस्य कथयति—"अभिव्यक्तं नभभैरक्षैर्द्वादशाक्षरम्। वदन्ति वृत्तजातिज्ञा वृत्तं द्रुतबिलम्बितम्।" (सुवृत्ततिलके १/२७) एतद्वृत्तं श्रीकृष्णभट्टेन 'सुन्दरी' ति नाम्ना निगदितम्— "नगणभद्वितयीरगणान्वितो भवति यच्चरणः सुखदायकः। जयति वृत्तमिदं खलु सुन्दरीत्युदितनामकमद्भुतभोगिना।" (वृत्तमुक्तावल्याम् ३/१७३) एतत्तु द्रुतबिलम्बितमेव वृत्तम्।

अन्वय— अयि कृशोदरि! यत्र चतुर्थकं सप्तमकं च तथा दशमं तथैव विरतिजं च (अक्षरं) गुरु (स्यात्), विचक्षणैर्द्रुतबिलम्बितमित्युपदिश्यते।

स्मृतिव्याख्या— जिस छन्द में द्वादश अक्षरों के प्रत्येक चरण होते हैं तथा इनमें चतुर्थ, सप्तम, दशम तथा द्वादश वर्ण गुरु रखे जाते हैं तो उसे छन्दःशास्त्र के विचक्षण विद्वान् द्रुतविलम्बित नामक छन्द की सञ्ज्ञा प्रदान करते हैं। पिङ्गलसूत्रकार ने द्रुतविलम्बित वृत्त का लक्षण करते हुए कहा है कि यदि नगण, मगण, भगण तथा रगण जिस छन्द के प्रत्येक पाद में क्रम से हों उसे द्रुतविलम्बित छन्द कहा जाता है— "द्रुतविलम्बितं न्भौ भ्रौ।" (पिङ्गलसूत्रे ६/३६) यही लक्षण वृत्तरत्नाकर (३/४९) तथा छन्दोमञ्जरी (२/७४) में भी दिया गया है। दोनों का लक्षणवाक्य एक ही है—"द्रुतविलम्बितमाह नभौ भरौ।" सुवृत्ततिलक में भी द्रुतविलम्बित का लक्षण दिया गया है— "अभिव्यक्तं नभभैरक्षैर्द्वादशाक्षरम्। वदन्ति वृत्तजातिज्ञा वृत्तं द्रुतविलम्बितम्।" (सुवृत्ततिलक १/२७) बृत्तमुक्तावली में द्रुतविलम्बित छन्द का लक्षण देते हुए इस वृत्तं का नाम 'सुन्दरी' कहा गया है—

"नगणभद्वितयीरगणान्वितो भवति यच्चरणः सुखदायकः।
जयति वृत्तमिदं खलु सुन्दरीत्युदितनामकमद्भुतभोगिना॥"

(वृत्तमुक्तावली ३/१७६)

कदाचित् गेय में रमणीयता होने के कारण श्रीकृष्णभट्ट जी ने इस छन्द का नाम सुन्दरी रखा होगा अथवा सुन्दरी की द्रुतविलम्बित गति का अवलोकन करके इसका नाम सहृदयों ने सुन्दरी रख दिया होगा।

उदाहरण[१]— न० भ० भ० र०
अयि कृशोदरि यत्र चतुर्थकं —— प्रथम पाद ।
१ २ ३ ४ ५६ ७८ ९१०११ १२
न० भ० भ० र०
गुरु च संसमकं दशमं तथा —— द्वितीय पाद ।
१२ ३ ४५६७ ८९ १०१११२

द्रुतविलम्बित के शेष चरणो में लघु गुरु अथवा गणों का यही क्रम रहेगा ।

अथ प्रमिताक्षरामाह

यदि तोटकस्य गुरु पञ्चमकं विहितं विलासिनि[२] तदक्षरकम् ।
रससङ्ख्यकं गुरु न चेद[३]बले प्रमिताक्षरेति कविभिः कथिता ॥३१॥

श्रुतिः— यदि तोटकस्येति प्रमिताक्षरा लक्ष्यते। हे अबले ! हे रमणि ! विलासिनि ! विलासशीले ! यदि चेत्तोटकस्योक्ततोटकवृत्तस्य चरणेषु पञ्चमकं पञ्चमाक्षरं गुरु विहितं स्यात्। रससङ्ख्यकं तदक्षरं षष्ठमक्षरं गुरु न स्यात् चेत् तर्हि कविभिः कोविदैः प्रमिताक्षरेति एतन्नामधेयं वृत्तं कथिताऽभिहितम्। अत्र पिङ्गलसूत्रे (६/४५) ऽस्य लक्षणमुक्तम्— "प्रमिताक्षरा स्जौ सौ।" वृत्तरत्नाकरे (३/६०) लक्षणमस्यनिगदितम्- "प्रमिताक्षरा सजससैरुदिता।" छन्दोमञ्जर्या (२/७३) मुक्तम्— "प्रमिताक्षरा सजससैःकथिता।" सुवृत्ततिलके वृत्तमुक्तावल्यां च नाऽस्य लक्षणं निगदितम्।

अन्वय—हे विलासिनि ! अबले ! यदि तोटकस्य पञ्चमकं गुरु विहितं, रससङ्ख्यकं तदक्षरं चेद् गुरु (स्यात् तर्हि) कविभिः प्रमिताक्षरेति कथिता।

स्मृतिव्याख्या—यदि तोटकछन्द के प्रत्येक चरण का पञ्चम वर्ण गुरु हो तथा षष्ठ वर्ण लघु हो तो कवियों के द्वारा उसे प्रमिताक्षरा छन्द कहा जाता है। पिङ्गलसूत्रकार इस छन्द का लक्षण बतलाते हुए लिखते हैं कि यदि प्रत्येक चरण में सगण, जगण, तथा दो सगण क्रम से हो तो उसे प्रमिताक्षरा छन्द कहते हैं। यथा— "प्रमिताक्षरा स्जौ सौ।"

---

१. द्वितीयोदाहरण— तरणिजापुलिने नववल्लवीपरिषदा सह केलिकुतूहलात् ।
द्रुतविलम्बितचारुविहारिणं हरिमहं हृदयेन सदा वहे ॥
२. 'शुभोदय' – इति पाठभेदः। 'भवेदिह'— इतिपाठान्तरम् ।
३. चेन्नियतम्'— इति पाठान्तरम् । 'चेन्न भवेत्'— इति पाठान्तरम् ।

(पि॰सू॰ ६/४५)। वृत्तरत्नाकर तथा छन्दोमञ्जरी में भी इसका लक्षण उद्धृत किया गया है–

१. "प्रमिताक्षरा सजससैरुदिता ।"– (वृत्तरत्नाकर ३/६०)

२. "प्रमिताक्षरा सजससैः कथिता"– (छन्दोमञ्जरी २/७६)

वृत्तमुक्तावली और सुवृत्ततिलक में इसका लक्षण नहीं कहा गया है।

उदाहरण[1]–

स॰ ज॰ स॰ स॰
यदि तोटकस्य गुरु पञ्चमकं —— प्रथमपाद।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२

स॰ ज॰ स॰ स॰
विहितं विलासिनि तदक्षरकम् । —— द्वितीयपाद।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२

इसी प्रकार प्रमिताक्षरा के शेष चरणों में लघु गुरु की व्यवस्था समझनी चाहिए।

अथ हरिणीप्लुतामाह

प्रथमाक्षरमाद्यतृतीययोर्द्रुतविलम्बितकस्य च पादयोः ।
यदि चेन्न तदा कमलेक्षणे भवति सुन्दरि सा हरिणीप्लुता ॥३२॥

श्रुतिः– 'प्रथमाक्षर'मिति हरिणीप्लुता लक्ष्यते। हे कमलेक्षणे! पद्माक्षि! सुन्दरि! शुभाङ्गे! यदि चेद् द्रुतविलम्बितकस्य पूर्वोक्तस्य छन्दस आद्यतृतीययोः पादयोः प्रथमतृतीयचरणयोः प्रथमाक्षरं न स्यात्तदा तर्हि सा हरिणीप्लुता नाम वृत्तजातिर्भवति। अस्य वृत्तस्य प्रथम तृतीययोः पादयोरेकादशवर्णा भवन्ति द्वितीय-चतुर्थचरणयोश्च द्वादशवर्णाः स्युः। एतदर्धसमवृत्तं वरीवर्ति। पिङ्गलसूत्रेऽस्य लक्षणं प्रोक्तम्–"हरिणप्लुता सौ स् लौ ग् न् भौ भ्रौ।" (पि॰सू॰ ५/४०)। वृत्तरत्नाकरे छन्दोमञ्जर्यां वृत्तमुक्तावल्यां च वृत्तमेतद् हरिणप्लुतेति कथ्यते। तल्लक्षणमुक्तं तद्तद्ग्रन्थेषु। यथा– "सयुगात्सलघूविषमे गुरुर्युजिनभौ

---

१. द्वितीयोदाहरण– अमृतस्य शीकरमिवोद्गिरन्ती
रदमौक्तिकांशुलहरीच्छुरिता ।
प्रमिताक्षरा मुररिपोर्भणितिर्
ब्रजसुभ्रुवामभिजहार मनः ।

२. 'भवतीह सा'– इति पाठान्तरम्

३. 'सकलवृत्तचये'– इति पाठान्तरम्

भरकौ हरिणप्लुता।" (वृत्तरत्नाकरे ४/८) छन्दोमञ्जर्याम् (२/१८१)– "मात्सौ जौ भरसंयुतौ करिबाणखैर्हरिणप्लुता।" वृत्तमुक्तावल्यामुक्तम्– "पठितं रहितप्रथमाक्षरं द्रुतविलम्बितमाद्यतृतीययोः। गदिता कविभिर्मतिशालिभिर्भवति सा भुवने हरिणप्लुता।।" (वृत्तमुक्तावल्याम् ३/१८८)

अन्वय– (हे) कमलेक्षणे ! सुन्दरि ! यदि द्रुतविलम्बितकस्य आद्यतृतीययोः पादयोः प्रथमाक्षरं चेन्न (भवति) तदा च सा हरिणीप्लुता भवति।

स्मृतिव्याख्या–यदि द्रुतविलम्बित छन्द के प्रथम तथा तृतीय चरण में प्रथम अक्षर न्यून हो तथा अन्य पादों में द्रुतविलम्बित छन्द के ही पाद रखे गये हों तो इसे हरिणीप्लुता छन्द कहते हैं। यह अर्द्धसमवृत्त है क्यों कि इसके प्रथम और तृतीय पाद में ११-११ अक्षर तथा द्वितीय और चतुर्थ पाद में १२-१२ अक्षर होते हैं। अन्य छन्दःशास्त्रकारों ने इसे हरिणप्लुता छन्द के नाम से व्यवहृत किया है। पिङ्गलसूत्र में इसका लक्षण दिया गया है कि जिसके प्रथम तृतीय चरण में तीन सगण, लघु गुरु हो तथा द्वितीय और चतुर्थ पाद में नगण, भगण, भगण तथा रगण हो तो उसे हरिणप्लुता छन्द कहते हैं– "हरिणप्लुता सौ स् लौग् न् भौ भ्रौ।" (पि०सू० ५/४०)। वृत्तरत्नाकर का लक्षण भी इसी प्रकार है– "सयुगात्सलघू विषमे गुरुर्युजि नभौ भरकौ हरिणप्लुता।" (वृत्तरत्नाकर ४/८) छन्दोमञ्जरी (२/१८१) में इसका लक्षण भिन्न है– "मात्सौ जौ भरसंयुतौ करिबाण खैर्हरिणप्लुता।" अर्थात् भगण, सगण, दो जगण, भगण तथा रगण से युक्त हरिणप्लुता छन्द होता है जिसमें ८, ५ तथा ५ अक्षरों पर यति होती है। वृत्तमुक्ता वली में इसका लक्षण श्रुतबोध के अनुसार ही है–"पठितं रहितप्रथमाक्षरं द्रुतविलम्बितमाद्यतृतीययोः। गदिता कविभिर्मतिशालिभिर्भवति सा भुवने हरिणप्लुता।" (वृत्तमुक्तावली ३/१८८)

उदाहरण[१]– स० स० स० ल०गु०
प्रथमाक्षरमाद्यतृतीययोर — प्रथमपाद।
१२ ३ ४५६७८९१०११
न० भ० भ० र०
द्रुतविलम्बितकस्य च पादयोः। — द्वितीयपाद।
१२३४५६७८९१०,११,१२

---

१. द्वितीयोदाहरण– स्फुटफेनचया हरिणप्लुता वलिमनोज्ञतटा तरणेः सुता।
कलहंसकुलारवशालिनी विहरतो हरति स्म हरेर्मनः।।

हरिणीप्लुता के प्रथम पाद के समान ही तृतीय पाद तथा द्वितीय पाद के समान ही चतुर्थ पाद भी रखा जाता है।

अथ वंशस्थमाह

उपेन्द्रवज्राचरणेषु सन्ति चेदुपान्त्यवर्णा लघवःकृता यदा ।
मदोल्लसद्भ्रूजितकामकार्मुके[1] ! वदन्ति वंशस्थमिदं बुधास्तदा ॥३३॥

श्रुतिः– 'उपेन्द्रवज्राचरणेष्विति वंशस्थं लक्ष्यते। मदोल्लसद्भ्रूजितकामकार्मुके ! मदेनोल्लसन्त्यौ भ्रुवौ ताभ्यां जितं कामकार्मुकं पञ्चशरधनुर्यया सा तत्सम्बुद्धौ। यदा चेद् यदि उपेन्द्रवज्राचरणेषु उपेन्द्रवज्रावृत्तपादेषु उपान्त्यवर्णा अन्त्यसमीपस्थिता वर्णा एकादशवर्ण लघवो ह्रस्वाः कृता विहिताः सन्ति तदा बुधाश्छन्दोमर्मज्ञा इदं वंशस्थमेतन्नामधेयं वृत्तं वदन्ति कथयन्ति पिङ्गलसूत्रे (६/३४) वृत्तमिदं वंशस्था नामधेयेन प्रोक्तं तद् यथा– **"वंशस्था जतौ ज् रौ।"** वृत्तरत्नाकरे (३/४६)– 'जतौ तु वंशस्थमुदीरितं जरौ" इति निगदितम्। छन्दोमञ्जर्या (२/६६) मस्य नाम 'वंशस्थविल' मिति कथितम्। तदुक्तं तत्र– **"वदन्ति वंशस्थविलं जतौ जरौ।"** सुवृत्ततिलकेऽप्युक्तं क्षेमेन्द्रेण- **"संलक्षितं जतजरैर्द्वादशाक्षरमक्षरैः। छन्दो विचक्षणा वृत्तं वंशस्थाख्यं प्रचक्षते ।"** (सुवृत्ततिलके १/२६) श्रुतबोधशैलीं गृहीत्वैव वृत्तमुक्तावल्या (३/१५०) मपि वंशस्थवृत्तलक्षणं भणितम्– **"उपेन्द्रवज्राचरणेषु चेद् भवन्त्युपान्त्यवर्णाः लघवः सुखप्रदाः। दिनेशसङ्ख्याक्षरशालि- वृत्तकं वदन्ति वंशस्थमिति प्रसिद्धमत्।"** एवं सर्वत्र वंशस्थलक्षणं न किञ्चिद् भिन्नं प्रवर्तते।

अन्वय– (हे) मदोल्लसद्भ्रूजितकामकार्मुके ! चेद् उपेन्द्रवज्राचरणेषु उपान्त्यवर्णा यदा लघवः कृताः सन्ति तदा बुधाः इदं वंशस्थं वदन्ति।

स्मृतिव्याख्या– उपेन्द्रवज्रा छन्द के सभी चरणों में यदि ग्यारहवाँ वर्ण लघु कर दिया जाय तो पण्डितजन उसे वंशस्थ छन्द कहते हैं। पिङ्गल सूत्र (६/३४) में इसे वंशस्था' कहा गया है तथा लक्षण देते हुए आचार्य ने लिखा है कि यदि जगण, तगण, जगण तथा रगण ये प्रत्येक चरण में क्रमशः हो तो उसे 'वंशस्था' (वंशस्थ) छन्द कहेगें– **"वंशस्था जतौ जरौ।"** 'वृत्तरत्नाकर' में भी लक्षण इसी प्रकार दिया गया है– **"जतौ तु वंशस्थमुदीरितं जरौ**

---

१. 'सदानतिभ्राजितभारतीरते'– इति पाठभेदः ।

'वृत्तेषुविज्ञा विदिता जगत्त्रये'– इति पाठान्तरम् ।

(वृत्तरत्नाकर ३/४६)।" 'छन्दोमञ्जरी' (२/६६) में इसे 'वंशस्थावल' नाम से अभिहित किया गया है– "वदन्ति वंशस्थविलं जतौ जरौ।" 'सुवृत्ततिलक' (१/२६) में क्षेमेन्द्र ने भी यही लक्षण लिखा है– संलक्षितं जतजरैर्द्वादशाक्षरमक्षरैः। छन्दोविचक्षणा वृत्तं वंशस्थाख्यं प्रचक्षते।" वृत्तमुक्तावली में श्रुतबोध के अनुसार ही वंशस्थ का लक्षण उक्त है–उपेन्द्रवज्राचरणेषु चेद् भवन्त्युपान्त्यवर्णा लघवः सुखप्रदाः। दिनेशसङ्ख्याक्षरशालि-वृत्तकं वदन्ति वंशस्थमिति प्रसिद्धमत्।" (वृत्तमुक्तावली ३/१५०)। इस प्रकार सर्वत्र वंशस्थ वृत्त का लक्षण एकसमान ही है, नाम कहीं 'वंशस्थ,' कहीं वंशस्था' तथा 'कहीं वंशस्थविल' कहा गया है लक्षण में भिन्नता नहीं है।

उदाहरण[1]–

ज० त० ज० र०
उपेन्द्रवज्राचरणेषु सन्ति चे — प्रथमपाद
१२३४ ५६७८९ १० ११ १२

ज० त० ज० र०
दुपान्त्यवर्णा लघवः कृता यदा — द्वितीयपाद
१२ ३४५ ६७८ ९१० ११ १२

इसी प्रकार शेष चरणों में भी लघु गुरु की व्यवस्था समझनी चाहिए।

अथेन्द्रवंशामाह

यस्यामशोकाङ्कुरपाणिपल्लवे[2] वंशस्थपादा गुरुपूर्ववर्णकाः ।
तारुण्यहेलारतिरङ्गलालसे तामिन्द्रवंशां कवयः प्रचक्षते ॥३४॥

श्रुतिः– 'यस्यामि'ति लक्षयतीन्द्रवंशाम् । हे अशोकाङ्कुरपाणिपल्लवे ! अशोकाङ्कुरसदृश-पाणिपल्लवो यस्याः सा तत्सम्बुद्धौ। तारुण्यहेलारतिरङ्गलालसे ! तारुण्यस्य नवयौवनस्य हेलास्ताभी रतिरङ्ग प्रीतिरागे लालसाऽभिलाषो यस्या सा तत्सम्बुद्धौ ! यस्यां वृत्तजातौ वंशस्थपादा वंशस्थच्छन्दसश्चरणाः गुरुवर्णपूर्वका पूर्वे वर्णाः गुरवो दीर्घा भवन्ति। कवयः कोविदास्तां वृत्तजातिमिन्द्रवंशामेतन्नामकीं प्रचक्षते ब्रुवते। पिङ्गल-सूत्रेऽस्य लक्षणं कथितम्– "इन्द्रवंशा तौ ज् रौ।" वृत्तरत्नाकरे (३/४६) "स्यादिन्द्रवंशा ततजै रसंयुतैः।"

---

१. द्वितीयोदाहरण– 'जनस्य तीव्रातपजार्तिवारणा जयन्ति सन्तः सततं समुन्नताः।
सितातपत्रप्रतिमा विभान्ति ये विशालवंशस्थतया गुणोचिताः ।।'

२. 'छन्दोविदामुक्तिकृतात्मसङ्गते'– इति पाठान्तरम् ।

३. 'विद्याविलासप्रिय ! यत्र नूनं'– पाठान्तरम् ।

गङ्गादासेन श्रुतबोधानुरूपमेवाऽस्य लक्षणं व्यलेखि– "तच्चेन्द्रवंशा प्रथमाक्षरे गुरौ (छन्दोमञ्जर्याम् २/६७)। नाऽस्य लक्षणं सुवृत्तलिके निगदितम्। वृत्तमुक्तावल्या (३/१५२) मप्यस्य लक्षणं लिखितं श्रीकृष्णभट्टेन– "वंशस्थवृत्ते यदि पूर्ववर्णका राजन्ति वक्रा सुखसारहेतवः।" एवं सर्वत्राऽस्य लक्षणं प्रायः श्रुतबोधकारानुसारमेव भणितम् ।

अन्वय– (हे) अशोकाङ्कुरपाणिपल्लवे ! तारुण्यहेलारतिरङ्गलालसे ! यस्यां वंशस्थपादा गुरुवर्णपूर्वकाः (भवन्ति), कवयः ताम् इन्द्रवंशां प्रचक्षते !

स्मृतिव्याख्या– यदि वंशस्थ वृत्त के सभी चरणों में प्रथम अक्षर गुरु हो तो कविजन उसे इन्द्रवंशा छन्द कहते हैं। पिङ्गलसूत्र में कहा गया है कि दो तगण, जगण और रगण यदि छन्द के प्रत्येक पाद में हो तो उसे इन्द्रवंशा छन्द कहेंगे– "इन्द्रवंशा तौ ज् रौ।" अन्य ग्रन्थों में इसके लक्षण अधोलिखित प्रकारेण दिये गये हैं–

१. स्यादिन्द्रवंशा ततजै रसंयुतैः (वृत्तरत्नाकर–३/४७)

२. तच्चेन्द्रवंशा प्रथमाक्षरे गुरौ (छन्दोमञ्जरी–२/६७)

३. वंशस्थवृत्ते यदि पूर्ववर्णका राजन्ति वक्रा सुखसारहेतवः।

(वृत्तमुक्तावली ३/१५२)

उदाहरण[1]–

त० त० ज० र०

यस्यामशोकाङ्कुरपाणिपल्लवे —— प्रथमपाद।

१ २३ ४ ५६७८ ९१०१११२

त० त० ज० र०

वंशस्थपादा गुरुवर्णपू र्वकाः । —— द्वितीयपाद।

१२ ३४ ५ ६७८९१०१११२

तृतीय तथा चतुर्थ चरण में भी इसी प्रकार गुरु लघु का क्रम रखना चाहिए।

अथ प्रभावतीमाह

यस्यां प्रिये[2] प्रथमकमक्षरद्वयं तुर्यं तथा गुरु नवमं दशान्तिकम् ।
सान्त्यं भवेद् यदि विरतिर्युगग्रहैः सा लक्षिता ह्यमृतलते प्रभावती ॥३५॥

---

१. द्वितीयोदाहरण– कुर्वीत यो देवगुरुद्विजन्मनामुर्वीपतिः पालनमर्थलिप्सया ।
तस्येन्द्रवंशेऽपि गृहीतजन्मनः सञ्जायते श्रीः प्रतिकूलवर्त्तिनी ॥

२. 'प्रिय'– इति पाठभेदः।

३. 'विपुलमते'– इति पाठान्तरम् ।

श्रुतिः— 'यस्यामि'ति प्रभावती लक्ष्यते। हे प्रिये ! अमृतलते ! पीयूषवल्लरि ! यस्यां वृत्तजातौ प्रथमकमक्षरद्वयं प्रथमं द्वितीयं चाऽक्षरं तुर्यं चतुर्थं नवमं नवमाक्षरं दशान्तिकमेकादशं सान्त्यमन्त्यवर्णसहितं त्रयोदशाक्षरं यदि गुरु भवेद् युगग्रहैश्चतुभिर्नव-भिश्चेति वर्णैर्विरतिर्यतिः स्यात् सा प्रभावती तन्नाम्नी वृत्तिर्लक्षिता निगदिता कविभिरिति। एतद्वृत्तं त्रयोदशाक्षरात्मकचरणं जायते। अप्रसिद्धत्वादस्य छन्दसो लक्षणं न वृत्तरत्नाकरादिषु दृश्यते। किन्तु वृत्तमुक्तावल्यामस्य लक्षणमेवमभाणि श्रीकृष्णभट्टेन—

"तान्तेगुरुर्नजरगणा यदि क्रमाद्दत्ता भवन्त्यनुपमरीतिशालिनः।
मोदावहा भवति यतिर्युगग्रहैः सा जीयते गरिमवती प्रभावती ॥"

(वृत्तमुक्तावली ३/१९०)

अन्वय— (हे) प्रिये ! अमृतलते ! यस्यां प्रथमकमक्षरद्वयं तथा तुर्यं नवमं सान्त्यं दशान्तिकं (च) गुरु भवेत् यदि युगग्रहैः विरतिः (स्यात्) सा हि प्रभावती लक्षिता।

स्मृतिव्याख्या— जिस छन्द के प्रत्येक चरण में त्रयोदश अक्षर हों तथा उनमें प्रथम दो अक्षर, चतुर्थ, नवम, एकादश तथा त्रयोदशवर्ण गुरु हों। इसके अतिरिक्त चार और नव अक्षर पर यति हो तो उसे प्रभावती वृत्त कहते हैं। इस छन्द के अत्यन्त, अप्रसिद्ध होने के कारण वृत्तरत्नाकर सुवृत्ततिलक आदि ग्रन्थो में इसके लक्षण उद्धृत नहीं हैं। 'वृत्तमुक्तावली' में कहा गया है कि यदि तगण, गुरु, नगण, जगण रगण क्रम से हों और चार तथा नव अक्षरों पर विराम हो तो उसे प्रभावती छन्द कहेंगे—

"तान्ते गुरुर्नजरगणा यदि क्रमाद्दत्ता भवन्त्यनुपमरीतिशालिनः ।
मोदावहा भवति यतिर्युगग्रहैः सा जीयते गरिमवती प्रभावती ॥

उपर्युक्त लक्षण को इस प्रकार भी निबद्ध किया जा सकता है जिसमें गुरु अन्त में पड़े— तगण, भगण, सगण, जगण तथा गुरु क्रम से हों तो भी प्रभावती छन्द कहा जा सकता है।

उदाहरण[१]—

तo भo सo जo गुo
यस्यां प्रियें प्रथमंकमंक्षं रं द्वं यम् — प्रथमपाद ।
१ २ ३४ ५६७८९१०१११२१३
तo भo सo जo गुo
तुर्यं तथां गुरुं नवमं दंशान्तिं कम् — द्वितीयपाद।
१२ ३ ४ ५६ ७८९ १०११ १२१३

शेष चरणों में भी लघु-गुरु का यही क्रम रहेगा।

अथ प्रहर्षिणीमाह

आद्यं चेत्त्रितयमथाष्टमं नवान्त्यं द्वे चान्त्ये गुरु विरतौ सुभाषिते[२]! स्यात्। विश्रामो भवति महेशनेत्रदिग्भिर्विज्ञेया ननु सुदति प्रहर्षिणी सा ॥३६॥

श्रुतिः— 'आद्य' मिति प्रहर्षिणीवृत्तं लक्ष्यते। हे सुभाषिते ! सुष्ठुभाषिते ! सुदति ! सुरदने! आद्यं प्रथमं त्रितयं वर्णत्रिकमथाष्टममनन्तरमष्टमं नवान्त्यं दशमम् उपान्त्यं द्वादशं विरतौ त्रयोदशाक्षरं च गुरु दीर्घं स्यात् । महेशनेत्रदिग्भि स्त्रिभि र्दशभिरक्षरैश्च विश्रामो यतिर्भवति, ननु सा प्रहर्षिणी विज्ञेया। पिङ्गलच्छन्दःसूत्रे अस्य लक्षणं निगदिम्— "प्रहर्षिणी म्नौ जरौग् त्रिकदशकौ।" वृत्तरत्नाकरे (३/७०) त्वस्य लक्षणं प्राह केदारभट्टः— "म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्।" छन्दोमञ्जर्या (२/९५) मुक्तमस्य लक्षणम्— "त्र्याशाभिर्मनजरगा प्रहर्षिणीयम्।" सुवृत्ततिलकेऽप्युक्तं प्रहर्षिणीवृत्तलक्षणं तद् यथा— "समन्वितं मनजरैश्छिन्नं पूर्वाक्षरैस्त्रिभिः। त्रयोदशाक्षरं नाम्ना कीर्तयन्ति प्रहर्षिणीम्।" (सुवृत्ततिलके १/२८)। वृत्तमुक्तावल्यामप्युक्तम्— लक्ष्मैतन्मनजरगाःक्रमेण कार्या विश्राममस्त्रिभिरथ दिग्भिरत्र धार्यः। भोगीन्द्रस्फुटमुखचन्द्रमा सुधेयं विख्याता कविषु भवेत्प्रहर्षिणीति। (वृत्तमुक्तावली ३/१८६)

---

१. 'कूजत्पिकीकलकलकाकलीकले
कुञ्जालये पुलकविसंष्ठुलाकृतिः ।
कृष्णोऽधुना तव मुखचन्द्रचन्द्रिका—
तृष्णोच्चलन्नयनचकोरकः स्थितः ॥'

२. 'सदुक्तिमन्'— इति पाठभेदः। 'तथैव भूयात्'— इति पाठान्तरम्

३. 'सुमते'— इति पाठान्तरम्। सुकविमता'— इति पाठान्तरम् ।

अन्वय– (हे) सुभाषिते ! सुदति ! आद्यं चेत् त्रित्रयमथाष्टमं नवान्त्यमुपान्त्यं विरतौ च (अक्षरं) गुरु स्यात् । महेशनेत्रदिग्भिविश्रामः भवति ननु सा प्रेहर्षिणी विज्ञेया।

स्मृतिव्याख्या– जिस छन्द के त्रयोदशाक्षरात्मक प्रत्येक पाद में प्रथम तीन अक्षर अष्टम, दशम, द्वादश त्रयोदश अक्षर दीर्घ हों और तीन तथा दश अक्षरों पर यति हो तो उसे प्रहर्षिणी छन्द कहते हैं। पिङ्गलसूत्र में कहा गया है कि यदि मगण, नगण, जगण तथा रगण और गुरु हों तो उसे प्रहर्षिणी छन्द कहेगें– "प्रहर्षिणी म्नौ ज्रौ ग् त्रिकदशकौ।" इसमें तीन तथा दश अक्षरों पर विराम होता है। अन्य ग्रन्थों में भी प्रहर्षिणी छन्द का लक्षण दिया गया है, जिनके लक्षण अधोलिखित हैं–

१. "म्नौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम्" (वृत्तरत्नाकर ३/७०)

२. "त्र्याशाभिर्मनजरगा प्रहर्षिणीयम्" (छन्दोमञ्जरी २/९५)

३. "समन्वितं मनजरैश्छिन्नं पूर्वाक्षरैस्त्रिभिः ।
त्रयोदशाक्षरं नाम्ना कीर्त्तयन्ति प्रहर्षिणीम् ।" (सुवृत्ततिलक १/२८)

४. लक्ष्मैतन्मनजरगाः क्रमेण कार्या विश्रामस्त्रिभिरथ दिग्भिरत्र धार्यः ।
भोगीन्द्रस्फुटमुखचन्द्रमा सुधेयं विख्याता कविषु भवेत्प्रहर्षिणीति ।"
(वृत्तमुक्तावली ३/१८६)

उदाहरण[१]–

म० न० ज० र० गु०
आद्यं चेत् त्रितयमथाष्टमं नवान्त्यं —— प्रथमपाद।
१२ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३

म० न० ज० र० गु०
द्वे चान्त्ये गुरु विरतौ सुभाषिते स्यात् । —— द्वितीयपाद।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३

इसीप्रकार अन्य चरणों में लघु-गुरु का क्रम समझना चाहिए।

अथ वसन्ततिलकामाह

आद्यं द्वितीयमपि चेद् गुरु तच्चतुर्थम् ।
यत्राष्टमं च दशमान्त्यमुपान्त्यमन्त्यम् ॥

---

१. द्वितीयोदाहरण– श्रीनाथे सुरवरपूजिताङ्घ्रिपद्मे कामारेः प्रियतम आर्त्तलोकबन्धौ ।
सर्वस्वे विषयवितृष्णमानसानां संसारे मतिरभवत् प्रहर्षिणीह ॥

कामाङ्कुशा[1]ङ्कुशितकामिमतङ्गजेन्द्रे
कान्ते वसन्ततिलकां किल तां वद[2]न्ति ॥३७॥

श्रुतिः– 'आद्यमिति वसन्ततिलका लक्ष्यते । हे कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे ! कामो मदन एवाङ्कुशस्तेनाऽङ्कुशिता स्वायत्तीकृताः वशीकृता वा कामिन एव मतङ्गजेन्द्रा मदमत्तहस्तिनो यया सा तत्सम्बुद्धौ ! कान्ते ! प्रिये ! यत्र यस्मिन् वृत्ते चेद् यदि आद्यं प्रथमं द्वितीयं, चतुर्थमष्टमं दशमान्त्यमेकादशमुपान्त्यं त्रयोदशमन्त्यं चतुर्दशं च गुरु स्यात । तदा किल निश्चयेन तां वृत्तजातिं वसन्ततिलकां तन्नाम्नीं वदन्ति कथय[illegible]वयः। लक्षणमेतस्य वृत्तस्य पिङ्गलच्छन्दःसूत्रे (७/८) निगदितम्– "वसन्ततिलका त्[illegible]ौ जौ गौ।" तत्रैव सूत्रद्वयेऽस्यापरनामद्वयं लिखितम् तद् यथा– "सिंहोन्नता काश्यपस्य।" "उद्धर्षिणी सैतवस्य" (७/९-१०) वृत्तरत्नाकरेऽप्युक्तं लक्षणमेतन्नामानि च–

"उक्ता वसन्ततिलका तभजा जगौ गः ।
सिंहोद्धतेयमुदिता मुनिकाश्यपेन ॥
उद्धर्षिणीति गदिता मुनिशैतवेन ।
श्रीपिङ्गलेन कथिता मधुमाधवीति ॥"

(वृत्तरत्नाकरे ३/७९-८२)

छन्दोमञ्जर्यामुक्तम्– "ज्ञेयं वसन्ततिलकं तभजा जगौ गः।" (छन्दोमञ्जर्यां २/११२) क्षेमेन्द्रो ब्रूतेऽत्र–"अभिज्ञातं तभजजैरन्तासक्तगुरुद्वयम्। चतुर्दशाक्षरं वृत्तं वसन्ततिलकं विदुः ।" (सुवृत्ततिलके १/२१)

वृत्तमुक्तावल्या (३/१९३) मप्युक्तम्–"वक्रद्वयं जगगतः सगणद्वयं स्यादन्ते तथैव यगणः सततं नियोज्यः। फुल्लद्वसन्ततिलकाञ्चितसौरभाढ्यं छन्दो वसन्ततिलका-- भिधर्मेतदुच्चैः।"

अन्वय– हे कामाङ्कुशाङ्कुशितकामिमतङ्गजेन्द्रे ! कान्ते ! यत्राद्यं द्वितीयमपि तच्चतुर्थमष्टमं दशमान्त्यमुपान्त्यमन्त्यञ्च चेद् गुरु (स्यात् तर्हि) तां किल वसन्ततिलकां वदन्ति।

स्मृतिव्याख्या– जिस छन्द में चतुर्दशाक्षरात्मक पाद में प्रथम, द्वितीय, चतुर्थ, अष्टम,

---

१. 'अष्टाभिरुज्ज्वलमते विरतिश्च षड्भिः'– इति पाठभेदः ।
'स्यादक्षरन्तु गुरुतासहितं तदानीं'– पाठान्तरम् ।

२. 'विज्ञा'– इति पाठान्तरम् । 'नाम्ना'– इति पाठभेदः ।

एकादश, त्रयोदश तथा चतुर्दश वर्ण गुरु हों, तो उसे वसन्ततिलका वृत्त कहते हैं, पिङ्गल सूत्र में कहा गया है कि तगण, भगण, जगण, जगण तथा दो गुरु यदि क्रम से हों तो उसे वसन्ततिलका छन्द कहते हैं। इसी छन्द को काश्यप आचार्य ने सिंहोन्नता और सैतव आचार्य ने उद्धर्षिणी कहा है– "वसन्ततिलका त्भौ जौ गौ। सिंहोन्नता काश्यपस्य। उद्धर्षिणी सैतवस्य।" (पिङ्गलसूत्र ७/८-१०) वृत्तरत्नाकर (३/७९-८२) में भी वसन्ततिलका छन्द का लक्षण दिया गया है जिसमें मुनि काश्यप के मत से इसका नाम 'सिंहोद्धता' तथा पिङ्गल के मत से 'मधुमाधवी कहा गया है–

उक्ता वसन्ततिलका तभजा जगौ गः ।
सिंहोद्धतेयमुदिता मुनिकाश्यपेन ॥
उद्धर्षिणीति गदिता मुनिशैतवेन ।
श्रीपिङ्गलेन कथिता मधुमाधवीति ॥

छन्दोमञ्जरी (२/११२) में भी वृत्तरत्नाकर के समान ही वसन्ततिलका छन्द का लक्षण उक्त है– "ज्ञेयं वसन्ततिलकं तभजा जगौ गः।" यहाँ इसका नाम 'वसन्ततिलक' है। आचार्य क्षेमेन्द्र ने वसन्ततिलका छन्द का लक्षण सुवृत्ततिलक (१/२९) में दिया है और इसका नाम 'वसन्ततिलक' रखा है–

"अभिज्ञातं तभजजैरन्तासक्तगुरुद्वयम् ।
चतुर्दशाक्षरं वृत्तं वसन्ततिलकं विदुः ॥"

वृत्तमुक्तावली में इसी लक्षण को भिन्न क्रम से इस प्रकार कहा गया है– दो गुरु, जगण, दो सगण, और यगण यदि क्रम से हों तो इसे वसन्ततिलका वृत्त कहते हैं–

"वक्रद्वयं जगणतः सगणद्वयं स्यादन्ते तथैव यगणः सततं नियोज्यः ।
फुल्लद्वसन्ततिलकाञ्चित सौरभाढ्यं छन्दो वसन्ततिलकाभिधमे तदुच्चैः ॥

(वृत्तमुक्तावली ३/१९३)

इस प्रकार लक्षण भिन्न क्रम से होने पर भी पिङ्गल सूत्र, वृत्तरत्नाकर आदि ग्रन्थों से अभिन्न ही है केवल क्रम का अन्तर है।

उदाहरण[१]—

त० भ० ज० ज० गु० गु०
आद्यं द्वितीयमपि चेद् गुरुं तच्चतुर्थम् — प्रथमपाद।
१२ ३ ४५६ ७ ८ ९१० ११ १२ १३ १४

त० भ० ज० ज० गु० गु०
यत्राष्टमं च दशमान्त्यमुपान्त्यमन्त्यम् — द्वितीयपाद।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४

अन्य चरणों में भी लघु-गुरु का क्रम इसी प्रकार रहेगा।

अथ मालिनीमाह

प्रथममगुरुषट्कं विद्यते यत्र कान्ते[२]
तदनु च दशमं चेदक्षरं द्वादशान्त्यम्[४] ।
करिभिरथ[३] तुरङ्गैर्यत्र कान्ते विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ॥३८॥

श्रुतिः— 'प्रथममगुरुषट्क' मिति मालिनीं लक्षयति। हे कान्ते! प्रिये! यत्र यस्मिन् वृत्ते प्रथमं षट्कं प्रथमाक्षरात्षडक्षरं यावदगुरु लघु भवति। तदनु दशमं द्वादशान्त्यं त्रयोदशं लघु। पञ्चदशाक्षरात्मकेषु चरणेषु शेषवर्णा दीर्घाः स्युश्चेत् करिभिरथ तुरङ्गैरष्टभिः सप्तभिश्च विरामो यतिस्तदा सुकविजनमनोज्ञा सुकविप्रिया सा मालिनी नामवृत्तजातिः प्रसिद्धा। एतद्वृत्तं कविषु प्रथितमित्यर्थः। पिङ्गलच्छन्दःसूत्रे (७/१४)— "मालिनी नौ म् यौ य्।" वृत्तरत्नाकरेऽप्युक्तम्— "ननमयययुतेयं मालिनी भोगिलोकैः।" (वृत्तरत्नाकरे ३/८७)। एवमेवच्छन्दोमञ्जर्या (२/१३४) मप्युक्तम्। क्षेमेन्द्रः कथयति— "अष्टाक्षरविरामेण युक्ता ननमयैः सयैः। वदन्ति मालिनी नाम वृत्तं पञ्चदशाक्षरम्।" (सुवृत्ततिलके १/३०) मालिनीच्छन्दसो

---

१. द्वितीयोदाहरण— तद्भाजि जन्मसचिवे भगवत्यनङ्गे
प्राप्ते लसत्कुसुममण्डलपाण्डुरेण ॥
भृङ्गावलीकुटिलकुन्तलसन्निवेशा
कान्ता वसन्ततिलकेन विभूषिता भूः ॥

२. 'वृत्ते'— इति पाठभेदः ।

३. 'गिरिभिरथ'— इति पाठान्तरम् ।

४. 'नूनम्'— इति पाठान्तरम् । 'भूयात्'— इति पाठान्तरम् ।

लक्षणं निगदितम् वृत्तमुक्तावल्याम् (३/२०८)– "नगणयुगलमादौ वक्रयुग्मं रयुग्मं तदनु कलय वक्रं तोषयन्भूमिशक्रम्।। प्रतिचरणनियम्यं वृत्तमेतत्सुरम्यं गुणिगणमुखगेयं मालिनीनामधेयम् ।।

अन्वय– (हे) कान्ते ! यत्र प्रथमं षट्कं तदनु दशमं द्वादशान्त्यं चेत् चाक्षरमगुरु विद्यते। (हे) कान्ते ! यत्र करिभिरथ तुरङ्गै र्विरामः (स्यात्तर्हि) सा सुकविजनमनोज्ञा मालिनी प्रसिद्धा (वर्तते)।

स्मृतिव्याख्या– जिस छन्द में प्रत्येक चरण में पन्द्रह वर्ण हों और प्रथम से छः अक्षर पर्यन्त, दशम और त्रयोदश अक्षर लघु हों। आठ तथा सात अक्षरों पर विराम हो तो उसे सुकविजनों का प्रिय मालिनी छन्द कहते हैं। पिङ्गलसूत्र (७/१४) में मालिनी वृत्त का लक्षण लिखते हुए कहा गया है कि नगण, नगण, मगण, यगण तथा यगण ये क्रम से हों तो उसे मालिनी वृत्त कहते हैं– "मालिनी नौ म्यौ य्।" वृत्तरत्नाकर (३/८७) तथा छन्दोमञ्जरी (२/१३४) में भी मालिनी छन्द का लक्षण दिया गया है– "ननमयययुतेयं मालिनी भोगिलोकैः।" सुवृत्ततिलक में आचार्य क्षेमेन्द्र भी मालिनी छन्द का लक्षण लिखते हैं– "अष्टाक्षरविरामेण युक्ता ननमयैः सयैः। वदन्ति मालिनी नाम वृत्तं पञ्चदशाक्षरम्।" (सुवृत्ततिलक १/३०) वृत्तमुक्तावली में भी मालिनी का लक्षण भिन्न प्रकारेण उद्धृत किया गया है किन्तु उसका आशय यही है जो वृत्तरत्नाकरादि ग्रन्थों में कहा गया है–

नगणयुगलमादौ वक्रयुग्मं रयुग्मं
तदनु कलय वक्रं तोषयन्भूमिशक्रम् ॥
प्रतिचरणनियम्यं वृत्तमेतत्सुरम्यं
गुणिगणमुखगेयं मालिनी नामधेयम् ॥
(वृत्तमुक्तावली ३/२०८)

उदाहरण[१]– न० न० म० य० य०
प्रथममगुरुषट्कं विद्यते यत्र कान्ते —— प्रथमपाद।
१२३४५६७८ ९१०११ १२१३ १४१५

१. द्वितीयोदाहरण– नन न नमयवाणी मेखलाकृष्टिकाले
प्रविचलदिव शीलं नोत्सृजन्ती दूकूलम् ।
तृणलवचलनेऽपि स्वैरिणी शङ्कमाना
दिशि दिशि कृतदृष्टिर्मालिनी कस्य नेष्टा ॥

न० न० म० य० य०
तदनु च दशमं चेदक्षरं द्वादशान्त्यम् —— द्वितीयपाद।
१२३ ४ ५६७ ८९१०११ १२१३१४ १५

मालिनी के शेष चरणों में इसी प्रकार गुरु-लघु की व्यवस्था करनी चाहिए।

अथ हरिणीमाह

सुमुखि[1] ! लघवः पञ्च प्राच्यास्ततो दशमान्तिक-
स्तदनु ललितालापे[2] वर्णौ यदि त्रिचतुर्दशौ ।
प्रभवति पुनर्यत्रोपान्त्यः स्फुरत्कर[3]कङ्कणे
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा ॥३९॥

श्रुतिः– 'सुमुखीति हरिणी लक्ष्यते। हे सुमुखि ! शुभानने ! स्फुरत्करकङ्कणे ! स्फुरन्ति करयोः कङ्कणानि यस्या सा तत्सम्बुद्धौ । यत्र यस्मिञ्छन्दसि प्राच्या प्रथमे पञ्च वर्णा लघवो ह्रस्वा भवन्ति । ततो दशमान्तिक एकादशस्तदनु तदनन्तरं त्रिचतुर्दशौ त्रयोदशचतुर्दशौ वर्णौ उपान्त्यः षोडशोऽपि वर्णो लघुः स्यात्। हे ललितालापे ! सुमधुरभाषिणि ! रसैः षड्भिर्वेदैश्चतुर्भिरश्वैश्च सप्तभिर्विरामः स्यात्तदा सा हरिणी स्मृता कथिता। अत्र पिङ्गलाचार्योऽपि ब्रूते– **"हरिणी त् सौ म्रौ स्लौ गृतुसमुद्रऋषयः।"** (पि०सू० ७/१६) वृत्तरत्नाकरे कथितम्– **"रसयुगहयैर्न् सौ म्ना स्लौ गो यदा हरिणी तदा।"** (वृत्तरत्नाकरे-३/९६) छन्दोमञ्जर्यां **'नर मरसलागः षड्वेदैर्हयैर्हरिणी मता।"** इति लक्षणं प्रोक्तम् (छन्दोमञ्जर्याम् २/१६७) क्षेमेन्द्रो ब्रवीति– "नसमै रसलैर्गेन युक्ता सप्तदशाक्षरा। विच्छिन्ना हरिणी षड्भिश्चतुर्भिः सप्तभिस्तथा।" (सुवृत्ततिलके १/३३)।

अन्वय– (हे) सुमुखि ! ललितालापे ! स्फुरत्करकङ्कणे ! यदि यत्र प्राच्याः पञ्च ततो दशमान्तिकस्तदनु त्रिचतुदशौ वर्णौ पुनरुपान्त्यो लघवः प्रभवति, रसैर्वेदैरश्वैर्यतिरपि (स्यात्) (तदा) सा हरिणीति स्मृता।

स्मृतिव्याख्या– जिसके चरण में सप्तदश वर्ण हों, उसमें प्रथम पाँच अक्षर लघु हों और

---

१. 'स्युरिह'– इति पाठभेदः। 'इह हि'– इति पाठान्तरम् ।
२. 'लघुतायुक्तौ'– इति पाठ भेदः।
३. अधिभारति सद्रते'– इतिपाठभेदः। 'ऽक्षरं लघुताऽङ्कितम्'– इति पाठभेदः ।

एकादश, त्रयोदश, चतुर्दश तथा षोड्श वर्ण भी ह्रस्व हों। छः, चार, तथा सात अक्षरों पर यति हो तो हरिणी नामक छन्द बनता है। पिङ्गलच्छन्दःसूत्रकार ने लिखा है कि यदि प्रत्येक चरण में नगण, सगण, मगण, रगण, सगण तथा लघु-गुरु क्रम से हो और छः चार तथा सात अक्षरों पर विराम हो तो वह हरिणी छन्द है–

"हरिणी न्सौ म्रौ स्लौ गृतुसमुद्रऋषयः।" (पि०सू० ७/१६) अन्य गन्थों में हरिणी छन्द के लक्षण अधोलिखित हैं–

१. "रसयुगहयैर्न्सौ म्ना स्लौ गो यदा हरिणी तदा।" (वृत्तरत्नाकर ३/९६)

२. "नरमरसलागः षड्वेदैर्हयैर्हरिणी मता।" (छन्दोमञ्जरी २/१६७)

३. नसमै रसलैर्गेन युक्ता सप्तदशाक्षरा।
विच्छिन्ना हरिणी षड्भिश्चतुर्भिःसप्तभिस्तथा॥"

(सुवृत्ततिलके १/३३)

उदाहरण[1]– न० स० म० र० स० ल०गु०
सुमुखि लघवः पञ्च प्राच्यास्ततो दश मान्ति कः —— प्रथमपाद।
१ २ ३ ४५६ ७८ ९ १० ११ १२ १३१४१५१६१७

न० स० म० र० स० ल०गु०
तदनु ललितालापे वर्णौ यदि त्रिचतुर्दशौ —— द्वितीयपाद।
१२३४५६७८९ १० ११ १२ १३ १४ १६ १७

लघु-गुरु की व्यवस्था अन्य चरणों में भी इसी प्रकार होगी।

अथ शिखरिणीमाह

यदा पूर्वो ह्रस्वः कमलनयने[2] षष्ठकपरा-
स्ततो वर्णाःपञ्च प्रकृतिसुकुमाराङ्गि[3], लघवः।

---

१. द्वितीयोदाहरण– न समरसनाः काले भोगाश्चलं धनयौवनं,
कुरुत! सुकृतं यावन्नेयं तनुः प्रविशार्यते।
किमपि कलना कालस्येयं प्रधावति सत्वरा,
तरुणहरिणी सन्त्रस्तेव प्लवप्रविसारिणी॥

२. 'भवति मतिमन्'– इतिपाठान्तरम् 'प्राच्योवर्णो भवति च लघुः'– इति पाठभेदः।

३. 'प्रकृतिसरल! स्युस्तु'– इति पाठान्तरम्। 'प्रकृतिसुभगा हन्त'– इति पाठभेदः

त्रयोऽन्ये चोपान्त्याः सुतनु[१] जघनाभोगसुभगे
रसै[२] रुद्रैर्यस्यां भवति विरतिः सा शिखरिणी ॥४०॥

श्रुतिः– 'यदेति शिखरिणी लक्ष्यते। हे कमलनयने ! पद्माक्षि ! प्रकृति-सुकुमाराङ्गि ! प्रकृत्या स्वभावेन सुकुमाराण्यङ्गानि यस्या सा तत्सम्बुद्धौ। सुतनु ! सुष्ठुकाये ! जघनाभोगसुभगे ! जघनयोराभोगस्तेन सुभगा तत्सम्बुद्धौ ! यदा यत्र पूर्वो वर्णः प्रथमो वर्णो ह्रस्वो लघुस्ततोऽनन्तरं षष्ठकपराः पञ्चवर्णा सप्तमाष्टमनवमदशमैकादशा वर्णा लघवो भवन्ति। ततश्चाऽन्ये उपान्त्यास्त्रयो वर्णाश्चतुर्दशपञ्चदशषोडशा लघवो भवन्ति। यस्याँ यस्मिन् वृत्ते रसैः षड्भी रुद्रैरेकादशैर्विरतिर्यतिर भवति स्यात् सा शिखरिणी नाम वृत्तं कथ्यते। तदुक्तं पिङ्गलच्छन्दःसूत्रे (७/२०)– शिखरिणी य्मौ न् सौ भ्लौ गृतुरुद्राः ।" वृत्तरत्नाकरे (३/९३) छन्दोमञ्जर्यां (२/१६३) चोक्तमस्य लक्षणम्– "रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।" तथोक्तं सुवृत्ततिलके (१/३४)– यमनैः सभलैर्गेन युक्ता सप्तदशाक्षरा। षडेकादशविच्छेदवती शिखरिणी मता।" तल्लक्षणमुक्तं वृत्तमुक्तावल्याम् (३/२२७)–

"पुरः शुद्धं वक्रं कुरु गुरुलघूनां सुरुचिरम् ।
चतुष्कं प्रत्येकं यगणनगणावन्तगुरुकौ ।
क्रमादेवं न्यासाऽतिशयसविलासाक्षरपदा ॥
रसै रुद्रैःर्युक्ता रचितयतिरुक्ता शिखरिणी ॥"

अन्वय– (हे) कमलनयने! प्रकृतिसुकुमाराङ्गि! सुतनु! जघनाभोगसुभगे! यदा पूर्वो (वर्णो) ह्रस्वः ततः षष्ठकपराः पञ्च वर्णा लघवः (भवन्ति) अन्ये चोपान्त्यास्त्रयः (वर्णा लघवः स्युः)। यस्यां रसैः रुद्रैः विरति भवति सा शिखरिणी (स्यात्)।

स्मृतिव्याख्या– जिसके प्रत्येक चरण में सप्तदश अक्षर होते हैं तथा उनमें प्रथम, सप्तम अष्टम, नवम, दशम, एकादश, चतुर्दश, पञ्चदश तथा षोडश अक्षर ह्रस्व हों और छः तथा ग्यारह अक्षरों पर यति हो तो उसे शिखरिणी छन्द कहते हैं। पिङ्गल सूत्र में कहा गया है

---

१. 'सुकविजनतासौख्यकरणी'– इति पाठान्तरम् ।
"तदनुविलसन्त्येव लघवो'– इति पाठान्तरम् ।

२. 'रसैरीशैः'– इति पाठभेदः ।

कि यदि यगण, मगण, नगण, सगण, भगण लघु और गुरु क्रमशः हो तो उसे शिखरिणी छन्द कहेंगे–

१. "शिखरिणी य् मौ न् सौ भ्लौ गृतुरुद्राः।" (पि०सू० ७/२०)

इसमें छः तथा ग्यारह वर्णों पर यति होती है। वृत्तरत्नाकरादि ग्रन्थों के लक्षण भी यहाँ उद्धृत किये जाते हैं–

२. "रसै रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।" – (वृत्तरत्नाकर ३/९३)
– (छन्दोमञ्जरी २/१६३)

३. "यमनैः सभलैर्गेन युक्ता सप्तदशाक्षरा ।
षडेकादशविच्छेदवती शिखरिणी मता ।।" –(सुवृत्ततिलक १/३४)

४. पुरः शुद्धं वक्रं कुरु गुरुलघूनां सुरुचिरम्
चतुष्कं प्रत्येकं यगणनगणावन्तगुरुकौ ।।
क्रमादेवं न्यासाऽतिशयसविलासाक्षरपदा
रसै रुद्रैर्युक्ता रचितयतिरुक्ता शिखरिणी (वृत्तमुक्तावली ३/२२७)

उदाहरण[1]– य० म० न० स० भ० ल०गु०
यदा पूर्वो ह्रस्वः कमलनयने षष्ठकपरा
य० म० न० स० भ० ल०गु०
स्ततो वर्णाः पञ्च प्रकृतिसुकुमाराङ्गि लघवः।

अन्य चरणों में भी लघु-गुरु का यही क्रम समझना चाहिए।

अथ पृथ्वीमाह

द्वितीयमलिकुन्तले[2] यदि षडष्टमं द्वादशं
चतुर्दशमथ प्रिये[3] गुरु गभीरनाभिह्रदे ।

---

१. द्वितीयोदाहरण– दुरालोकस्तोकस्तबकनवकाशोककलिका
विकासः कासारोपवनपवनोऽपि व्यथयति ।
अपि भ्राम्यद् भृङ्गीरणितरमणीया न मुकुल-
प्रसूतिश्चूतानां सखि ! शिखरिणीयं सुखयति ।।

२. 'द्वितीयमयि श्रीमतांप्रिय'– इति पाठभेदः । द्वितीयमपि चाक्षरं'– इति पाठभेदः ।

३. 'चतुर्दशमथालघु प्रकृतिधीर ! विद्यार्थिनाम्'– इति पाठान्तरम् ।
'चतुर्दशमथो भवेत्कुरु तथैव तत्राक्षरम्'– इति पाठान्तरम् ।

सपञ्चदशमन्तिमं तदनु यत्र कान्ते[१] यतिः
करीन्द्रफणिभृत्कुलैर्भवति सुभ्रु पृथ्वी हि सा ॥४१॥

श्रुतिः– 'द्वितीयमलिकुन्तल' इति पृथ्वी लक्ष्यते। हे अलिकुन्तले! अलिवद् भ्रमरसदृशकृष्णा कुन्तलाऽलका यस्या सा तत्सम्बुद्धौ । गभीरनाभिह्रदे! गभीरा निम्ना नाभिरेव ह्रदो यस्याः सा तत्सम्बुद्धौ ! हे प्रिये ! प्रेयसि ! यत्र यस्मिन् वृत्ते षडष्टमं षष्ठमष्टमं च द्वादशं चतुर्दश मथ सपञ्चदशमन्तिमं पञ्चदशाक्षरेण सहाऽन्तिमं सप्तदशाक्षरं गुरु यदि स्यात् । हे सुभ्रु ! सुष्ठुभ्रु! कान्ते! प्रियतमे! करीन्द्रैरष्टभिः फणिभृत्कुलैर्नवभिश्च यतिः स्यात् तर्हि सा पृथ्वी नाम वृत्तजातिर्भवति। तदुक्तं पिङ्गलसूत्रे (७/१०) "पृथ्वी ज् सौ ज् सौ य् लौ ग् वसुनवकौ।" वृत्तरत्नाकरे (३/९४) छन्दोमञ्जर्यां (२/१६४) चोक्तम्– "जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः।सुवृत्ततिलकेऽप्युक्तम्–"जसजैःसयलैर्गेन युताष्टनवसंहृतिः। दश सप्ताक्षरा पृथ्वी कथिता वृत्तकोविदैः।" (सुवृत्ततिलके १/३२) अस्य लक्षणं वृत्तमुक्तावल्यामेवं निगदितम्– "जशुद्धजगुरुत्तरं नगणरद्वयं चेद् भवेत् तदा सफल-वाग्मिभिर्भृशमभाणि पृथ्वीति तत्॥ विभाति यतिरष्टभिर्नवभिरक्षरैर्मोददा, विमोहितसभासदा समुदयेल्लसद्वृत्तके।"– (वृत्तमुक्तावल्याम् ३/२२२)

अन्वय– (हे) अलिकुन्तले ! गभीरनाभिह्रदे ! प्रिये ! यत्र द्वितीयं षडष्टमं द्वादशं चतुर्दशमथ सपञ्चदशमन्तिमं गुरु (भवेत्) (हे) सुभ्रु ! कान्ते ! तदनु करीन्द्रफणिभृत्कुलैर्यतिर्भवति, सा हि पृथ्वी (स्यात्)।

स्मृतिव्याख्या– जिस छन्द के प्रत्येक चरण में सप्तदशाक्षर हों जिनमें द्वितीय, षष्ठ, अष्टम, द्वादश, चतुर्दश, पञ्चदश और सप्तदश अक्षर गुरु हों तथा आठ और नव अक्षरों पर यति हो तो उसे पृथ्वी छन्द कहते हैं। पिङ्गलसूत्र में लिखा है कि यदि जिसके प्रत्येक चरण में जगण, सगण, जगण, सगण, यगण, लघु और गुरु क्रम से हो तो उसे पृथ्वी छन्द कहते हैं– "पृथ्वी ज् सौ ज् सौ य्लौ ग् वसुनवकौ।" (पि०सू० ७/१७) यहाँ आठ तथा नव अक्षरों पर विरति भी होती है। अन्य ग्रन्थों में भी इसके लक्षण उक्त हैं–

१. "जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः।" (वृत्तरत्नाकर ३/९४)
(छन्दोमञ्जरी २/१६४)

२. "जसजैः सयलैर्गेन युताष्टनवसंहृतिः ।
दशसप्ताक्षरा पृथ्वी कथिता वृत्तकोविदैः॥" (सुवृत्ततिलक १/३२)

---

१. 'नूनम्'– इति पाठभेदः। 'भूयात्'– इति पाठान्तरम् ।

२. 'तत्र'– इति पाठभेदः। 'निगदिता नु'– इति पाठान्तरम् ।

३. "जशुद्धजगुरुत्तरं नगणरद्वयं चेद्भवेत् ।
तदा सफलवाग्मिभिर्भृशमभाणि पृथ्वीति तत् ।
विभाति यतिरष्टभिनवभिरक्षरैर्मोददा ।
विमोहितसभासदा समुदयेल्लसद्वृत्तके ।।" (वृत्तमुक्तावली ३/२२२)

उदाहरण[१]— ज० स० ज० स० य० ल०गु०
द्विंतींयंमलिंकुंन्तलें यंदिं षं डंष्टं मं द्वां दं शं — प्रथमपाद।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७
ज० स० ज० स० य० ल०गु०
चंतुंर्दं शंमर्थं प्रिंयें गुंरुं गंभीरं नांभिं हं दें। — द्वितीयपाद।
१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७

अन्य पादों में लघु-गुरु की व्यवस्था इसीप्रकार रहेगी।

अथ शार्दूलविक्रीडितमाह

आद्याश्चेद् गुरवस्त्रयः प्रियतमे[२] षष्ठस्तथा चाष्टमो ।
नन्वेकादशतस्त्रयस्तदनु[३] चेदष्टादशाद्यौ ततः ॥
मार्तण्डैर्मुनिभिश्च[४] यत्र विरति पूर्णेन्दुबिम्बानने[५] ।
तद्वृत्तं प्रवदन्ति काव्यरसिका शार्दूलविक्रीडितम् ॥४२॥

श्रुतिः— 'आद्या' इति शार्दूलविक्रीडितं लक्षयति। हे प्रियतमे ! प्रिये ! पूर्णेन्दु-बिम्बानने ! पूर्णिमोदितचन्द्रबिम्बमुखि ! आद्याश्चेद् यदि प्रथमाः त्रयः त्रिसङ्ख्यका वर्णाः गुरवो दीर्घाः

---

१. द्वितीयोदाहरण— दृशौ तव मदालसे वदनमिन्दुमत्यास्पदम् ।
गतिर्जनमनोरमा विजितरम्भमूरुद्वयम् ।
रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा-
वहो बिबुधयौवतं वहति तन्वि ! पृथ्वीगता।।

२. 'यदि ततः'— इति पाठान्तरम्। 'विरचिताः'— इति पाठ भेदः ।

३. 'स्यादेकादशतः--------- तन्वष्टादशाद्यान्तिमाः'— इति पाठभेदः।
'सन्त्येकादशतः ------- चेदष्टादशाद्यान्तिमाः'— इति पाठान्तरम् ।

४. 'वर्णाश्चेद् विरतिस्तथा हि मुनिभिः'— इति पाठान्तरम् ।

५. 'छन्दोऽनुसन्धानकृत्'— इति पाठान्तरम् ।
'सूर्यैश्च यत्रोदिता'— इति पाठभेदः ।

स्युस्तथा षष्ठोऽष्टमश्च वर्णो गुरुः स्यात् ननु निश्चयरूपेणैकादशतस्त्रयो द्वादश-त्रयोदशचतुर्दशा वर्णा गुरवः स्युस्तदनु तदनन्तरं चाऽष्टादशाद्यौ षोडशसप्तदशौ वर्णौ गुरू स्याताञ्चेदेकोनविंशोऽपि गुरुर्भवेत् । यत्र यस्मिंश्च वृत्ते मार्त्तण्डैर्द्वादशभिर्मुनिभिः सप्तभिश्चाऽक्षरैर्विरतिर्यतिर्भवेत् तर्हि काव्यरसिका काव्यसहृदयास्तद् वृत्तं शार्दूलविक्रीडितमिति नाम्ना प्रवदन्ति प्रब्रुवन्ति। अत्र पिङ्गलाचार्यो ब्रूते–"शार्दूलविक्रीडितं म्सौ ज्सौ तौ गादित्यऋषयः।" (पि०सू० ७/२२) वृत्तरत्नाकरे (३/१०१) छन्दोमञ्जर्यां (२/१९८) चोक्तमस्य लक्षणम्– "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्।" सुवृत्ततिलके(१/३६) ऽप्युक्तम्–"मसजैः सततै-र्गेन युक्तमेकोनविंशवत्।शार्दूलक्रीडितं प्राहुश्छिन्नं द्वादश सप्तभिः।" वृत्तमुक्तावल्या (३/२४३) मस्य लक्षणमुक्तम्–

"दत्त्वादौ मगणं ततः सजगणौ सान्ते ततस्तद्द्वयं ।
तस्यान्ते गुरुमेकमुच्चर सखे ! कृत्वा मतिं निश्चलाम् ॥
इत्युच्चैः प्रचरच्चतुश्चरणभाक् सम्भाव्यमानाक्षरम् ।
छन्दः सन्ततसुन्दरं विजयते शार्दूलविक्रीडितम् ॥"

अन्वय– (हे) प्रियतमे ! पूर्णेन्दुबिम्बानने ! यत्र चेद् आद्याः त्रयोगुरवः (स्युः) तथा षष्ठोऽष्टमश्च, ननु एकादशतस्त्रयस्तदनु चेद् अष्टादशाद्यौ ततः (एकोनविंशो गुरुः स्यात्)। मार्त्तण्डैर्मुनिभिश्च विरतिर्भवेत्। काव्यरसिकाः तद् वृत्तं शार्दूलविक्रीडितं प्रवदन्ति।

स्मृतिव्याख्या– जिस छन्द के प्रत्येक पाद में उन्नीसवर्ण हों, जिनमें प्रथम तीन अक्षर, षष्ठ, अष्टम, द्वादश, त्रयोदश, चतुर्दश, षोडश, सप्तदश और अन्तिम एकोनविंश (उन्नीसवां) अक्षर गुरु हों तथा बारह और सात अक्षरों पर यति हो, तो काव्यरसिक जन उसे शार्दूलविक्रीडित छन्द कहते हैं। आचार्य पिङ्गल ने लिखा है कि मगण, सगण, जगण, सगण, तगण, तगण तथा गुरु क्रम से हों तो उसे शार्दूल विक्राडित वृत्त कहते हैं। यहाँ बारह तथा सात अक्षरों पर विरति होनी चाहिए। अन्य ग्रन्थों में, शार्दूल विक्रीडित का यही लक्षण दिया गया है–

१. "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ।"
(वृत्तरत्नाकर ३/१०१, छन्दोमञ्जरी २/१९८)

२. "मसजैः सततैर्गेन युक्तमेकोनविंशवत् ।
शार्दूलविक्रीडितं प्राहुश्छिन्नं द्वादशसप्तभिः ॥" – (सुवृत्ततिलक १/३६)

३. दत्त्वादौ मगणं ततः सजगणौ सान्ते ततस्तद्द्वयं ।
तस्यान्ते गुरुमेकमुच्चर सखे ! कृत्वा मतिं निश्चलाम् ॥
इत्युच्चैः प्रचरच्चतुश्चरणभाक् सम्भाव्यमानाक्षरम् ।

छन्दः सन्ततसुन्दरं विजयते शार्दूलविक्रीडितम् ।। (वृत्तमुक्तावली ३/२४३)

उदाहरण[१]— म० स० ज० स० त० त० गु०

आँद्याँश्चेंद् गुंरंवंस्त्रंयः प्रिंयंतंमें. षंष्ठंस्तंथाँ चाँष्टंमाँ। — प्रथमपाद।

१ २ ३ ४५६७८ ९१०१११२ १३१४१५१६ १७१८१९

म० स० ज० स० त० त० गु०

नंन्वेंकांदंशंतंस्त्रंयंस्तं दंनु चेंदं ष्टों दं शाँ द्यौं तं तंः। —द्वितीयपाद।

१ २ ३४५६ ७८ ९ १०११ १२१३१४१५१६१७ १८१९

तृतीय तथा चतुर्थ चरण में भी लघु-गुरु का क्रम इसी प्रकार रहेगा ।

अथ स्रग्धरामाह

चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोऽपि ।
द्वौ तद्वत्षोडशाद्यौ मृगमदमुदिते[२] षोडशान्त्यौ तथान्त्यौ ॥
रम्भास्तम्भोरुकान्ते[३] मुनिमुनिमुनिभिर्दृश्यते चेद् विरामो ।
बाले[४] वन्द्यैः कवीन्द्रैः सुतनु[५] निगदिता स्रग्धरा[६] सा प्रसिद्धा ॥४३॥

श्रुतिः— 'चत्वार' इति स्रग्धरा लक्ष्यते। हे मृगमदमुदिते ! कस्तूरिकामोदप्रसन्ने ! रम्भास्तम्भोरुकान्ते ! कदलीस्तम्भोरम्यजघने ! सुतनु ! सुशोभनाङ्गे ! बाले ! षोडशि ! यत्र यस्मिन् छन्दसि ! प्रथमं चत्वारो वर्णा अलघवो गुरवः स्युः षष्ठकः सप्तमोऽपि तद्वद् गुरु

---

१. द्वितीयोदाहरण— माद्यत्सङ्गसमाततोग्रसुभटोद्भिन्नेभ कुम्भस्थल-
श्लिष्यन्मौक्तिकदन्तुरः सरभसोद्वेल्लद्यशः केशरः।
जृम्भारम्भभयङ्करव्यतिकरत्रस्तैः समुद्वीक्षितः ।
शत्रूणां त्वदसिः करोति समरे शार्दूलविक्रीडितम् ॥

२. 'श्रुतिधरपथभृत्'— इति पाठान्तरम् । 'गुरुगतिकलितौ'— इति पाठभेदः ।

३. 'छन्दःशास्त्राभिलाषिन्'— इति पाठभेदः। वृत्ते यस्मिन् मनोज्ञे— इति पाठभेदः।

४. 'शिष्य ! स्तुत्यैः'— इति पाठभेदः। 'सेयम्'— इति पाठभेदः ।

५. 'सतत'— इति पाठभेदः सपदि'— इति पाठान्तरम् ।

६. 'स्रग्धरेति' इति पाठान्तरम् ।

षोडशाद्यौ चतुर्दशपञ्चदशौ षोडशान्त्यौ सप्तदशाष्टादशौ द्वौ वर्णों दीघौ स्याताम् । तथान्त्यौ विंशैकविशौ गुरू भवेताम्। मुनिमुनिमुनिभिः सप्तसप्तसप्तभिश्चेद् यदि विरामो यतिः स्यात् तदा सा वन्द्यैर्वन्दनीयैः श्रेष्ठैः कवीन्द्रैः कविवरैः प्रसिद्धा स्रग्धरा एतन्नामवृत्तजाति र्निगदिता भणिता वर्तते। पिङ्गलसूत्रे (७/२५) स्रग्धराच्छन्दसो लक्षणमुक्तम्– "स्रग्धरा म्रौ भ्नौ यौ य् त्रिसप्तकाः।" वृत्तरत्नाकरे (३/१०४) छन्दोमञ्जर्यां (२/२१२) चोक्तमस्य लक्षणम्– "म्रभ्नैर्यानां त्रयेण त्रिमुनि यतियुता स्रग्धरा कीर्तितेयम् ।" सुवृत्ततिलके (१/३७) कथितम्– "युक्तं मरभनैर्यैश्च त्रिभिः सप्ताक्षरैस्त्रिभिः। छेदैश्च स्रग्धरावृत्तमेकविंशाक्षरं विदुः।" वृत्तमुक्तावल्यां (३/२५६) स्रग्धरावृत्तस्य लक्षणमुक्तम्–

पूर्वे स्युर्वेदवक्रास्तदुपरि यगणः शुद्धषट्कं च बक्रो ।
रद्वन्द्वान्तेऽथ वक्रः पुनरपि चरणानीति चत्वारि यस्याम् ॥
मार्त्तण्डाश्वैर्मुनीन्द्रैः पुनरपि मुनिभिर्यत्र विश्रान्तिरुक्ता ।
छन्दःसन्दोहकल्पद्रुमकुसुमकृत स्रग्धरा स्रग्धरा सा ॥"

एवमत्र श्रुतबोधे सर्वाणि वृत्तानि सुष्ठुतया व्याख्यातानि। छात्राणां व्युत्पत्तयेऽत्र पिङ्गलवृत्तरत्नाकरच्छन्दोमञ्जरीसुवृत्ततिलकवृत्तमुक्तावलीगतवृत्तलक्षणानि टीकायामस्यां यथास्थानं सम्यगुक्तानि वर्तन्ते। एषा श्रुतिर्टीका श्रुतबोधाध्येतॄणां कृते परमोपादेया भविष्यतीति मे मतिः ।

श्रीकालिदासरचिते 'श्रुतबोध' सञ्ज्ञे ।
बालावबोधजननीं 'श्रुति' नामधेयाम् ॥
टीकां सुवृत्तसुमनाञ्च बृजेशशुक्लः ।
कृत्वाऽर्पयत्यजसुतापदकञ्जयुग्मे ॥
'श्रुतबोध-श्रुति' श्चैषा श्रवणाद् हृदयङ्गता ।
छात्रवृन्दोपकाराय निर्मिता सम्मिता मया ॥

॥ इति कालिदास रचिते श्रुतबोधग्रन्थे बृजेशकुमारशुक्लप्रणीता 'श्रुति' टीका समाप्ता ॥

अन्यव्– (हे) मृगमदमुदिते ! रम्भास्तम्भोरुकान्ते ! सुतनु ! बाले ! यत्र प्रथमं चत्वारो वर्णा अलघवः (स्युः), षष्ठकः समगेऽपि (दीर्घौ भवेत्) तद्वत् षोडशाद्यौ द्वौ षोडशान्त्यौ तथान्त्यौ (दीर्घौ स्याताम्)। मुनिमुनिमुनिभिश्चेद् विरामो दृश्यते (तर्हि) वन्द्यैः कवीन्द्रैः प्रसिद्धा सा स्रग्धरा निगदिता ।

स्मृतिव्याख्या– जिस छन्द के प्रत्येक चरण में इक्कीस वर्ण हों जिनमें प्रथम चार अक्षर, षष्ठ, सप्तम, चतुर्दश, पञ्चदश, सप्तदश, अष्टादश, विंशति (बीसवाँ) और इक्कीसवाँ अक्षर गुरु हो सात-सात अक्षरों पर विराम (यति) हो तो उसे वन्दनीय श्रेष्ठ कवि प्रसिद्ध स्रग्धरा नामक छन्द कहते हैं। पिङ्गलच्छन्दःसूत्र में इसका लक्षण देते हुए कहा गया है कि यदि प्रत्येक चरण में मगण, रगण, भगण, नगण तथा तीन यगण हों तो उसे स्रग्धरा छन्द कहते हैं। सात-सात अक्षरों पर विराम (यति) होनी चाहिए। यथा– "स्रग्धरा म्रौ भ्नौ यौ य् त्रिसप्तगाः।" (पि०सू० ७/२५)। वृत्तरत्नाकर (३/१०४) तथा छन्दोमञ्जरी (२/२१२) में इस छन्द का लक्षण इस प्रकार है– "म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्त्तितेयम्।" आचार्य क्षेमेन्द्र ने सुवृत्ततिलक (१/३७) में स्रग्धरा का लक्षण दिया है– "युक्तं मरभनैर्यैश्च त्रिभिः सप्ताक्षरैस्त्रिभिः। छेदैश्च स्रग्धरावृत्तमेकविंशाक्षरं विदुः।" स्रग्धरा छन्द में ही वृत्तमुक्तावलीकार श्रीकृष्णभट्ट ने भी इस छन्द का लक्षण लिखा है जो अधोलिखित है–

"पूर्वे स्युर्वेदवक्रास्तदुपरि यगणः शुद्धषट्कं च वक्रो ।
रद्वन्द्वान्तेऽथ वक्रः पुनरपि चरणानीति चत्वारि यस्याम् ॥
मार्त्तण्डाश्वैर्मुनीन्द्रैः पुनरपि मुनिभिर्यत्र विश्रान्तिरुक्ता ।
छन्दःसन्दोहकल्पद्रुमकुसुमकृतस्रग्धरा स्रग्धरा सा ॥"

इस प्रकार सर्वत्र स्रग्धरा छन्द का यह लक्षण एक समान ही है।

उदाहरण[१]– म० र० भ० न० य० य० य०

चत्वारो यत्र वर्णा प्रथम म म ल घ वः षष्ठ कः स स मोऽपि —प्रथमपाद।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१

म० र० भ० न० य० य० य०

द्वौ तद्वत्सोडशाद्यौ मृग म द मु दि तौ षो ड शान्त्यौ तथान्त्यौ —द्वितीयपाद।

१ २ ३ ४ ५ ६ ७ ८ ९ १० ११ १२ १३ १४ १५ १६ १७ १८ १९ २० २१

स्रग्धरा के अन्य तृतीय तथा चतुर्थ चरणों में गुरु-लघु की व्यवस्था ऐसी ही होगी ।

॥ इति स्मृतिव्याख्या ॥

---

१. द्वितीयोदाहरण– सारम्भानुभावप्रियपरिचयया स्वर्गरङ्गाङ्गनानाम् ।
लीलाकर्णावतंसश्रियमतनुगुणश्लेषया संश्रयन्त्या ॥
आभाति व्यक्तमुक्ताविचकिलवली वृन्दकुन्देन्दुकान्त्या ।
त्वत्कीर्त्या भूषितेयं भुवनपरिवृढस्रग्धरेव त्रिलोकी ॥

सहायकग्रन्थानुक्रमणिका

१. छन्दः कौमुदी– श्री नारायणशास्त्रि खिस्ते, चौखम्बा संस्कृत सीरीज आफिस, बनारस सिटी–१९४४

२. छन्दोमञ्जरी (स्टीकवङ्गानुवादसहित)– श्रीगङ्गादास, सम्पादक– रामधन भट्टाचार्य, धर्मतला स्ट्रीट, कलकत्ता–१९३५

३. पिङ्गलच्छन्दःसूत्रम्– पिङ्गलाचार्य (हलायुधभट्टकृतवृत्तिसहितम्) सम्पादक– जीवानन्द विद्यासागर भट्टाचार्य, कलिकाता-१९२८

४. ध्वन्यालोकः– आनन्दवर्धन, सम्पादक– पं० दुर्गाप्रसाद काशीनाथ पाण्डुरङ्ग परब, मुंशीराम मनोहरलाल, नई दिल्ली– १९८३

५. वृत्तरत्नाकर– केदारभट्ट ('पञ्चिका' टीकायुक्तः) सम्पादक– आचार्य श्रीशीलस्कन्धमहास्थविर, निर्णयसागर मुद्रणालय मुम्बई– १९०८.

६. वृत्तरत्नाकर– केदारभट्ट (नारायणभट्टीटीकायुक्तः)– सम्पादक-वैद्यनाथशास्त्री, चौखम्बा संस्कृतसीरीज आफिस, विद्या विलास प्रेस, बनारस सिटी–१९४८

७. वृत्तमुक्तावली– श्रीकृष्णभट्टकवि, सम्पादकः– भट्टश्रीमथुरानाथशास्त्री, राजस्थान प्राच्यविद्या प्रतिष्ठान जोधपुर– १९६३

८. सुवृत्ततिलकम्– आचार्य क्षेमेन्द्र, ('प्रकाश' हिन्दीव्याख्योपेतम्) श्री पं० ब्रजमोहन झा, चौखम्बा संस्कृत सीरीज आफिस वाराणसी– १९६८

९. श्रुतबोध-वृत्तरत्नाकर (सटीकः)– वेङ्कटेश्वर प्रेस मुम्बई।

१०. श्रुतबोधः-कालिदासः ('विमला' संस्कृतहिन्दीटीकोपेतः)– श्री कनकलाल ठक्कुरः, चौखम्बा विद्याभवन, वाराणसी– १९८९.